# भारती

संस्कृत-मासपत्रिका

ISSN 2249-698X

फाल्गुनः
वर्षम्–६८
पञ्चमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ मार्च २०१७

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

रङ्गक्रीडापरा बालाः फाल्गुने होलिकोत्सवे।
गोपीः कृष्णं स्मरन्तश्च खेलन्ति विलसन्ति च।।



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | डॉ. नलिनीशुक्लायाः रचनासंसारः | डॉ. सुरचना त्रिवेदी | ६ |
| ५ | सप्तर्षिकाङ्ग्रेसानुसारेण १९७७ तमे वर्षे ........... | नरेन्द्रसिंह चौहानः | ९ |
| ६ | संस्कृतनाटकपरम्परा | डॉ. रामेश्वरप्रसादगुप्तः | १२ |
| ७ | वसन्तः | पं. कृष्णगोपाल ब्रजेशः | १३ |
| ८ | पुत्रिकासमीक्षा | देवर्षिकलानाथशास्त्री | १४ |
| ९ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १५ |
| १० | लघुकथा- | अनुवादकः - डॉ. सत्यव्रत वर्मा | १६ |
| ११ | मातृकृतं गर्भस्थशिशुस्तोत्रम् | डॉ. हर्षदेवमाधवः | १९ |
| १२ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | २० |
| १३ | आचार्य डॉ. नारायणशास्त्रिकाङ्कर-कथा...... | डॉ. अनीता अग्रवाल | २१ |
| १४ | साहित्ये शब्दार्थयोः बोधः | अरुण शर्मा | २२ |
| १५ | नारी-स्तम्भः | डा. राजेश्वरी भट्ट | २७ |
| १६ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | २९ |
| १७ | संस्कृतसमाचाराः | रामानुजपाण्डेयः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाले यस्य विराजते शशिकला कण्ठे भुजङ्गावलि-
र्लोकानामघनाशिनी भगवती भागीरथी मस्तके।
अङ्के यस्य नगाधिराजतनया पाणौ त्रिशूलं तथा
पूज्यं तं शिवशङ्करं पशुपतिं वन्दामहे भूतये।।

## मासावतरणम्

मन्दं याति शनैः शनैः शिशिरजं शैत्यं सदा फाल्गुने
आरामेषु चिराय यान्ति ललनाः साकं स्वकान्तैर्मुदा।।
उद्यानेषु वनेषु च प्रमुदिताः नृत्यन्ति गायन्ति च।
सेवन्ते न सहस्रभानुकिरणान् स्वास्थ्याय धावन्ति च।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

फाल्गुनमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
मार्च, 2017
अङ्कः - 5
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# राजनीतौ विलुप्तप्रायः शिष्टाचारः

...✍ पं. प्यारेमोहनशर्मा

संप्रति भारतीयराजनीतौ सर्वाधिकसमस्या निर्वाचनेषु यद्धनं व्ययीक्रियते तत् सितं वा कृष्णं वा वर्तते इति नास्ति। राजनीतौ समाजकण्टकानां प्रायशो भ्रष्टाचारोऽपि नास्ति विचारणीयः। अस्माकं नेतारः समये समये उक्तसमस्याविषये परस्परं चर्चां कुर्वन्ति। आभ्यः सर्वाभ्यो दूरं सर्वाधिका महती समस्या तु सामान्यशिष्टाचारस्य सभ्यतायाश्च वर्तते या च राजनीतौ शनैः शनैः लुप्तप्राया जायते। अथवा क्तुं शक्नुमो यत् सामान्यशिष्टाचारः क्षीणतामुपगतः। यद्यपि संप्रति राजनीतिक्रीड़ा कठिनप्रतिस्पर्धायाः क्रीडा विद्यते। अस्यां क्रीडायां यो भागं गृह्णाति सर्वं संलग्नं जायते। प्राचीनकालादेव वयं शृणुमो यद् युद्धे प्रेम्णि च सर्वं समुचितं विद्यते। राजनीतिविषयेऽपि इदमेव कथयितुं शक्नुमः यत्र सर्वं समुचितमिति। अर्थात् राजनीतिरपि युद्धमेव विद्यते तच्च युद्धं निर्वाचनमाध्यमेनैव दलैः परस्परं युध्यते। परन्तु युद्धे नियमाः परिपाल्यन्ते। महाभारतकालेऽपि युद्धनियमाः सम्मानिता अविद्यन्त। वयमस्माकं प्राचीनसभ्यतायां गर्वं कुर्मः सर्वं जगत् स्वीकरोति यत् भरतीयसभ्यता संस्कृतिः प्रचीनतमा सर्वश्रेष्ठा चाविद्यत। परं न जाने किमिति वयं गौरवशालिनीं प्राचीनामस्माकं सभ्यतां विस्मरामः। महाभारतीय युद्ध-शास्त्रानुसारं पराजितस्यापि शत्रोः अग्रज इव सम्मानो विधेयः। संप्रति राजनीतौ नास्य नियमस्य परिपालनं विधीयते। आवश्यकता तु विद्यते यदाधुनिकराजनीतौ अपि सिद्धान्तोऽयं परिपालनीयः। परन्तु अस्माकं राजनेतारो निर्वाचन-समये सर्वमिदं विस्मरन्ति। एषा प्रवृत्तिः अस्माकं संस्कृतौ दुःखप्रदा सर्वाधिकघातुका च विद्यते। अस्माकं परस्परं मतभेदाः भवितुं शक्नुवन्ति। परन्तु कस्याप्युपरि उपानह-प्रक्षेपणं न कथमप्युचितम्। पञ्चनदप्रान्तस्य-ऊननवति-वर्षीयैः (८९) मुख्यमन्त्रिप्रकाशसिंहबादल-महोदयैः सह एतादृशो व्यवहारः सम्प्रत्येव विहितः। एतादृशी घटना तीव्ररूपेण भर्त्सनीया एव यतोहि कृत्यमिदं वरिष्ठतायाः अनुभवस्य वापमानं विद्यते। परन्तु दुर्भाग्यवशाल्लोका निन्दामपि न कुर्वन्ति। पुलिसकृत्यं न पर्याप्तमेतादृशे विषये।

आदर्शस्तु तदैव भवेत् यदा एतादृशविषयेषु प्रतिपक्षीयो नेता स्वयं घोषणां कुर्यात् यत् स विपक्षीयवरिष्ठराजनेतुः सार्वजनिकरूपेणापमाने स्वीयं नामाङ्कनं प्रत्यावर्तयति इत्थं यदि विदधाति तदा तस्य सदस्यस्य सम्मानो वर्धिष्यते। परन्तु वयं महापुरुषा इत्यभिलाषया लोकदृशि निम्ना असम्माननीया एव भवामः। न केवलं बादलस्य तादृशोऽपमानोऽभवत् अपि तु इतः पूर्वमपि नेतृषु कृष्णवर्णास्याहीप्रक्षेपणं मुखे प्रताडनादिकं संजातम्। नैकेषु नेतृषु मुख्यमन्त्रिमुखेषु उपानहाः प्रक्षिप्ताः। दिल्लीनगरस्य मुख्यमन्त्रिणः अरविन्द-केजरीवालस्योपरि नैकवारमुपानहा प्रक्षिप्ताः। एतादृशी-घटनानां सर्वाधिकं दुःखप्रदं कार्यं तु तद् विद्यते यद् यैः घटनानां निन्दा करणीया ते मूकदर्शका भूत्वा आनन्दं अनुभवन्ति। यद्यपि लोकतन्त्रे अन्योन्योपरि टिप्पणीः निन्दाकरणं व्यङ्ग्योक्तिः समालोचनाप्रभृति-कार्याणि सामान्यरूपेण जायन्ते। लोकतन्त्रस्यैतानि सामान्याङ्गानि। परन्तु यदा एतानि कार्याणि कस्याप्यमानरूपतां गृह्णन्ति तदा वरिष्ठैः विचारः करणीय एव। एका लक्ष्मणरेखा निर्धारणीया एव। लोकतन्त्रं नैतदाज्ञापयति यत् समुदायविशेषं प्रति अथवा व्यक्तिविशेषं प्रति अपमानस्य निरादरस्य च कोऽपि प्रसारं कुर्यात्। परन्तु संप्रति सर्वमिदं राजनेतृणां संवादस्या-वश्यकताभूताः संजाता इति दृष्टिपथमायाति। अद्य केन्द्रसत्तासीना भारतीयजनतादलनेतारः समाचारपत्रेषु नरेन्द्रमोदी-महोदयोपरि या टिप्पण्यो विधीयन्ते ताः प्रधानमन्त्रिणः गरिमाणं पातयन्तीति कथयन्ति।

परन्तु तैः स्मरणीयं लोकसभानिर्वाचनसभासु प्रचारमाध्यमेन पूर्वप्रधानमन्त्रिमनमोहनोपरि भवद्भिरेव क्षुद्राः अपमानजनिकाः टिप्पण्यो नैकशो विहिताः। राहुलगान्धिनः उपहासस्तैः विहितः। सत्तापक्षी विपक्षीयश्चोभावेव निर्वाचन

प्रचारकाले सर्वेऽपि समाचारपत्रमाध्यमेनानर्गलाः अपमान-जनकाः टिप्पण्यश्च कृतवन्तः। परन्तु रामायणे स्वयं रामः रावणस्य विद्वत्तां प्रशंसति। अतो यदि सम्प्रतिकाः नेतारः आत्मानं भाषादिषु संयमिनं न विधास्यन्ति तर्हि नवयुवकास्तथैव सर्वेषामनादरमेव विधास्यन्ति। अतोऽत्र विचारो विधेयः।

**विधानसभानिर्वाचनेषु मुस्लिममतदातॄणामुत्तरदायित्वम्**

मुस्लिम वोटबैङ्कस्य (मतदातृकोषस्य) विवादास्पद-धारणा 1952 वर्षस्य प्रथमसामान्य निर्वाचनकालादेव आसीत्। विभाजनानन्तरं भारतीयमुस्लिमसमुदायस्यानन-तुल्या मोलाना-आजाद हिन्दूबहुलक्षेत्रात् निर्वाचनायोत्सुका आसन् तथा कृते तेषां ''धर्मनिरपेक्ष'' व्यक्तित्वं प्रमाणितं भविष्यति। परन्तु प्रधानमन्त्री जवाहरलालनेहरूमहोदयः समादिशत् यद् भवन्तः मुस्लिमबाहुल्ययुक्तात् रामपुरजन-पदात् निर्वाचनाय समुपस्थिता भवन्तु। यतोहि नेहरू महोदयः स्वमहत्वपूर्णमित्रस्य निर्वाचनभविष्यं निश्चितं विजयीरूपेण द्रष्टुकामोऽवर्तत। अनिच्छयापि आजादः तेषां कथनमङ्गी-चकार। 1957 वर्षस्य निर्वाचंन ते गुडगाँवतोऽयुध्यन्। स्वकीयामिच्छामपूरयन्। ततः प्रभृति धारणा संजाता यदुत्तरप्रदेशे मुस्लिमराजनेतारो निर्वाचने स्वसहधर्मिणां सहयोगेनैव विजयं प्राप्तुं शक्नुवन्ति।

मोलाना-आजादं हिन्दूमुस्लिम-एकताया मूर्तिमन्तं पुरुषमित्यमन्यन्त जनाः-समाजवादिदलस्य सर्वमान्यो नेता विधायक आजमखानः विनाशकारी आक्रामकशैल्या ''मुस्लिमः प्रथमः'' इति घोषं करोति। तां शैलीं धर्मनिरपेक्षतारूपेण घोषयन्ति। सम्यग्विज्ञाय मुस्लिम-मतदातारमाकर्षणाय तथानेनाचरितम्। विकासोऽल्पसंख्य-कानां कथं स्यादिति धारणां विहाय ते मुस्लिमसमुदायं भयभीतं कुर्वन्ति असुरक्षितो मुस्लिमसमुदाय इति कथयन्ति। आजमखानदृष्टौ नरेन्द्रमोदीमहोदयो मुस्लिमसमुदायस्य कृते भयप्रदाता वर्तते। ते एतद्वर्णनं मे निर्वाचने सफलताप्राप्त्यै प्रमुखं भावं मानयन्ति। असत्यभाषणशीलः आजमखानः कदाचिदकथयत् करगिलयुद्धे मुसलमाना विजयमवाप्नुवन्। एतादृशस्यासत्यभाषिणः साहचर्यं समाजवादिदलमधुनापि स्वीकरोति। केवलमेतदर्थं यद्राज्यस्य अष्टादशप्रतिशतं मुस्लिममतानि आजमखानाधीनानि। समाजवादिदलस्य मुस्लिममतबैङ्क मुलायमसिंहयादव द्वारा कारसेवकानामुपरि 1990 वर्षे दृष्टौ समानं कारसेवकं सद्यः गोलिकामारणादेशो विदत्तः। यद्यपि समाजवादीदलं मुस्लिमजनेभ्यः सुरक्षाप्रदाने असफलं जातम्। सर्वकारभृत्यकार्ये मुस्लिममेव न्ययोजयत् समाजवादिदलसर्वकारः।

बहुजनसमाजवादिदलस्य नेत्री मायावती दलित-मुस्लिमान् स्वदले समाकर्षितवती। मुख्तार अंसारी सदृशान् दुर्दान्त दस्यु सदृशान् 100 शतं मुस्लिमजनान् निर्वाचने-स्वदलेन टिकटं प्रायच्छत्। एतेन मुलायमसिंहस्य मुस्लिममतानि तया त्रोटितानि मुस्लिम-वोट-विभाजन-भयादेव कांग्रेससमाजवादिदले अमिलताम्। भाजपादलेन 2014 वर्षे मुजफ्फरनगरसंघर्षभयं दर्शयित्वा निर्वाचने सफलता प्राप्ता। हिन्दुत्ववादिनां सामर्थ्येन भयाक्रान्ताः, मुसलमानाः कुण्ठिताः कुद्धाश्चाजायन्त। एते जामामस्जिदस्य शाहीइमामतुल्याः समुदायस्य स्वयंभू (ठेकेदार) नान्तरात्मना स्वीकुर्वन्ति। एते सदैव निर्वाचनेभ्यः प्रकटिता जायन्ते।

मुसलमानेषु (कट्टरता) दृढता वर्धते इति नास्ति सत्यम्। सर्वकारः समर्थनं उदारभावञ्च धारयेदिति नास्ति समीचीनः उपायः। तुष्टीकरणस्याप्यावश्यकता न विद्यते। वस्तुतः समाधानं वर्तते परस्परमन्योन्योपरि निर्भरता। बागपते इक्षुक्षेत्रस्वामीजाटो यदि मुस्लिमकृषिकर्मकारस्य साहचर्य सम्मानं च कुर्यात् वाराणस्यां शाटिकानां स्वामिनः शाटिकानिर्मातृषु कर्मकारेषु सौहार्दं प्रदर्शयेत् एतत् कार्यं स एव कर्तुं शक्नोति यो विश्वसनीयः स्यात् यस्मिन् द्वाभ्यां संप्रदायाभ्यां विश्वासः स्यात्। उत्तरप्रदेशः 21 एकविंशति शताब्द्या आजादं नेहरूं च स्मरति। हिन्दु मुसलमानौ द्वौ ताला चाबी वद्वर्तेताम् एकं विना द्वितीयः नहि जीवति।

अन्ते च निष्कर्षरूपेण कथयितुं शक्नुमो यद् भारतवर्षे द्वावेव सम्प्रदायौ परस्परं निर्भयौ विद्येते यतः नेतारोऽपि उभयोर्मध्ये सामञ्जस्यस्थापनाय प्रयतेयुः।

# डॉ. नलिनीशुक्लायाः रचनासंसारः

❑ डॉ. सुरचना त्रिवेदी

मानवोऽयं लोके सर्वश्रेष्ठः विवेकवान् प्राणी। विवेको मननशीलता वा तस्य विशिष्टो गुणः। एवं हि तस्य निरन्तर-चिन्तन-प्रवणे मस्तिष्केऽनुक्षणं प्रादुर्भवन् सद्भावजो विचाराणां तन्तुः वयति सत्साहित्य-प्रावरकम्। येनाऽलङ्कृता समाजस्य तनूः सुतरां भवति गौरवाऽन्विता। एतदेव हि पुष्पाणि प्रत्यङ्गं प्रत्यवयवञ्च सुसंस्कृततामपरिमितां शोभां, द्रूणाति च तनुप्रदूषिकाम-संस्कृतां कुलक्षणहन्वितां विकृतिपरम्पराम्। एतदेव हि ज्ञानराशेः सञ्चितकोषरुपेण परिलक्ष्यमाणं साहित्यं लोके सम्पद्यते समाजस्य समुन्नायकं सुख-शान्ति-संवाहकं सत्व-प्रतिष्ठापकञ्च। याथार्थ्यतस्तु-साहित्यमेव भवति सुसंस्कृत-समाजिक-जीवनस्य मूलभित्तिः आधार-शिला वेति।

तत्र हि 'कथा साहित्यस्य आत्मा, जीवनं, प्राणः' इति नाऽतिशयोक्तिपरं वचः। कथा एव हि मूलबीजम्-आख्यानकस्य काव्यस्य नाटकस्य अन्यद्रूपस्य वा साहित्यस्य। मानवानां या हि सहजा स्वाभाविक-जिज्ञासामयी भावना 'ततः परं किम् ?' इति सेयं प्रतिफलिता सती 'कथा' इति रूपमादधाति। तस्मादेव हि आबालवृद्धानां समेषामेव मनांसि रञ्जयितुं, सारल्येन देश-कालभेदेन सर्वत्र च यथेयं ज्ञानमयी कथावृत्तिर्भवति सत्कथा, न तथा काव्यं न नाट्यं, न चाऽप्यन्यद्रूपं वा किमपि साहित्यम्। मधुराक्षरैरुपनिबद्धेयं कथा समेषां हृदि दृढतरं पदमादधाति। सर्वे एव स्पृहयन्ति कथाभ्यः, बालाः भवन्तु वृद्धाः वा, तरुणाः भवन्तु प्रौढ़ा वा, नार्यः भवन्तु पुरुषाः वा। सत्यम्-

मधुराऽक्षरवतीयं कथा स्रवति यद्रसम्। न तदन्यत्र कुत्रापि प्राप्तुं शक्यं कदाचन। सेयं कथा एकतः शिक्षणे बालानां भवति सर्वोत्कृष्टं रुचिकरं सरसं साधनम् (माध्यमम्), अपरतश्च सैव विविधाऽनुभूति-भावना-कल्पनाऽनु-स्यूता भवति मानव-जीवन-संस्करणे सामाजिक-परिवेश-परिष्करणे च सर्वतोभावेन समर्था इति। 'कथाभिरेव सारल्येन स्यान्नियमनमुन्नयनञ्च वैयक्तिक-जीवनाधारस्य चेतसः, सामाजिक-जीवन-संचालकस्य प्रचेतसः मस्तिष्कस्यापि' इति मत्वैव सर्वत्र वाङ्मये वेदेषु ब्राह्मणेषु-उपनिषत्सु च सन्दृश्यते कथाऽभिनिवेशः। प्रबुद्धाः सन्तो मनीषिणश्चाहर्निशं सत्कथा-परितोषित-प्रवचननिर्देशैरेव निर्दिशन्ति लोके लोककर्त्तव्यानां पन्थानम्। किम्बहुना-शास्त्रविमुखानां विवेकरहितानां राजपुत्राणां बुद्धिप्रकाशाय नीतिशास्त्र-तत्वाधिगमाय च विष्णुशर्मणः पण्डितस्य कथा-परिनिष्ठितमार्ग एवाभूत् प्रेयान् सुगमः सिद्धिदश्च।

सत्यमिदं, यत्-कथाकारः (साहित्यकारो वा) सामाजिक-चेतनायामेव श्वसिति, सामाजिके जीवने यदपि श्वेत-कृष्णं, सुखं-दुःखं, सुकृतं-दुष्कृतं शर्माऽशर्म वा पश्यति तदेव सर्वमात्मसात्कृत्य स्वान्तःसुखाय स्वीकृतौ प्रस्तौति, किन्तु तस्य तदात्मसात्करणमेव तत्र लौकिकेऽति-सामान्येऽपि कर्मणि समुत्पादयति किमप्यनिर्वचनीयमद्भुतं प्रभावकारि वैशिष्ट्यं, यद्धि कवेः कवित्वं कृतित्वं वेति प्रख्याप्राप्तं सञ्जायते लोकहिताय।

एवं हि साहित्यसृष्टिं विधित्सुर्हि ऋषिद्रष्टा कविः (साहित्यकारः कथाकारो वा) वर्तमाने लोके घटितं प्राणि-जीवन-घटना-बिन्दुमेकमादाय भुवने समग्र-लोक-हितसाधनाय परमं किमप्यनुपमेयमेव सञ्जीवनं जीवन-रसायनं प्रस्तोतुं कामयते। इत्थं साहित्ये कथासु

आख्यायिकासु कथा-तत्त्व-समुज्जृम्भितेषु काव्येषु नाटकेषु इतरगद्यविधानेषु वापि कदाचित् ईदृग्विधमपि वर्णनं प्राप्यते यत्र भवति दैनन्दिन-जीवन-घटितं, सर्वत्र च यथार्थ-प्रख्याऽवाप्तं वा। अत्राऽस्ति प्रमुखो हेतुः, यत्र साहित्ये केवलं जीवनरूपं निधातुमीहते साहित्यकारः, यदत्र लोकजीवने भवदस्ति, अपि तु स तदपि तत्र निधातुमीहते यज्जीवनकामनासु भवति निहितं, न भवतु तदेकस्मिन् कस्मिन्नपि जीवने पूर्णं तदन्यत्।

एवं तस्य कृते सामाजिक-जीवनं तावदेव महत्त्वमावहति यावत्तत् सुविराजः सार्वकालिक-जीवनस्य परिकल्पनायां प्रभवति। अत एव साहित्यकारः (कथाकारः स्यात् काव्यकारः नाटककारो वा) देश-काल-परिस्थिति-सीमा-प्रबन्धन-मुक्तः सार्वकालिक-सार्वभौम-समाजस्य प्रतिनिधिः इति कृत्वा समाजे सर्वत्र समाद्रियते। नाऽत्र सन्देहः-एतादृशेष्वेव प्राप्त-सरस्वती-कृपा-पीयूष-प्रभावेषु विविध-विधात्मक-साहित्य-संरचना-प्रवण-स्वभावेषु कविमनीषिषु देशे-प्रदेशेषु विदेशेषु चाऽपि 'परमाद्भुत-प्रतिभा-भास्वती' इति समवाप्तयशोविभूतिः डा. (श्रीमती) नलिनीशुक्ला, यस्याः संस्कृते राष्ट्र-भाषायां हिन्द्यामपि प्रजागर्ति कथाऽऽख्यानक-नाट्य-गीति-प्रभृतिषु समानोऽ-धिकारः साहित्य-संरचना-विधासु।

डॉ. नलिनी शुक्ला इटावा जनपदे भरथनायाः निकटे "**कंधेसीपचार**" इत्याख्ये ग्रामे चत्वारिंशदुत्तरैकोन-विंशतिशततमेऽब्दे जूनमासस्याष्टम्यां तारिकायां (08.06.1940) समजनिष्ट। अस्याः माता श्रीमती पद्मावतीमिश्रा पिता च पं. श्रीइन्द्रदत्तमिश्रोऽभूत्।

डॉ. नलिनी नवषष्ट्युत्तरैकोनविंशतिशततमे खीष्टाब्दे कर्णपुरस्थे "आचार्यनरेन्द्रदेवनगरनिगममहिला-महा-विद्यालये" प्रवक्तृपदमुपाचार्यपदञ्चाङ्गीकृत्य द्विसहस्र-तमे खीष्टाब्दे सेवानिवृत्ता सञ्जाता। हिन्दीसंस्कृतो-भयोर्भाषयो रचनाः तथा बहुभिः पुरस्कारैः सम्मानैः मानदोपाधिभिश्च सभाजिता। नैकेभ्यो वर्षेभ्यः शरीरेणास्वस्थाप्येषा विविधसंस्कृतकार्यक्रमाणामा-योजनं शोधच्छात्राणां शोधकार्येषु निर्देशनञ्च कुर्वन्ती संस्कृतसमृद्ध्यर्थं कृतप्रयासा वर्तते। एतस्याः कृतित्वं यथा-**प्रकीर्णम्**-विविधविषयेषु अनुष्टुप्छन्दसि शतसंख्यकाः श्लोकाः वर्तन्ते।

**भावाञ्जलिः**- एकविंशतिस्तोत्रयुते मुक्तक-काव्येऽमिन् देवाभ्यर्चने सरसमनोहारिण्यः स्तुतयः विविधछन्दोबद्धाः सन्ति।

**वाणीशतकम्**- दार्शनिकतान्त्रिकशैल्यां भारत्याः स्तुतौ शिखरिणीवृत्तेऽष्टाधिकशतसंख्यकाः श्लोकाः वर्तन्ते। शतकमिदं प्रकाशितं पुरस्कृतञ्च वर्तते।

**निर्झरिणी**- विविधभावोपबद्धानां सरसगीतानां संग्रहो वर्तते।

**श्रीनिखिलेश्वरशतकम्**- स्वामिश्रीनिखिलेश्वरा-नन्दमहाभागानां स्तुतौ नवाधिकशतसंख्याकाः भक्तिभावयुताः श्लोकाः सन्ति। प्रत्येकं श्लोकान्ते "वन्दे निखिलं ते चरणारविन्दम्" इति पदमायाति।

**स्वरूपलहरी**- भगवतीं सरस्वतीमाश्रित्य दर्शन-तन्त्र शैल्यामष्टाधिकशतं श्लोकाः सन्ति।

**श्रीमालवीयश्लोकाञ्जलिः**-स्वातन्त्र्यस्वर्णसौरभ-मिति नाम ग्रन्थे प्रकाशितमिदं काव्यम्।

**श्रीमालवीयकाव्यम्**- पं. मदनमोहनमालवीय-महाभागानां विषये शास्त्रीयवृत्तोपनिबद्धमिदम्।

**यज्ञात्मभारतम्**-इयं लघुकाव्यरचना। अस्यां नवभारतस्याखण्डता-शिष्टता-नम्रतादीनां भावाः विद्यमानाः सन्ति।

**राधानुनयः**-लघ्वीसंगीतनाटिकायामस्यां पञ्च-दृश्यानि वर्तन्ते। विविधरागोपबद्धानि छन्दांसि अतीव मनोहारीणी। शृङ्गारोऽत्र प्रधानत्वेन राजते।

**पार्वतीतपश्चर्या**-महाकविकालिदासविरचितं कुमारसम्भवमाश्रित्य नृत्यनाटिकायाः सर्जना कृता।

**क्रान्तिवीराङ्गना**-पुस्तकेऽस्मिन् वीराङ्गनानां जीवनचरितमाधृत्य वीररसात्मकमिदं नाटकं वर्तते। मध्ये-मध्ये ''शेर'' इति उर्दूकविताविधायां कविता: सन्ति। सम्प्रति नेदं पूर्णत्वमवाप्तम्।

**मुक्तिमहोत्सवः**-दृश्याधारितमिदमपि रूपकं वर्तते।

**क्रान्तिवीरकथाकौमुदी**-क्रान्तिकारिणां वीराणामस्यामुत्कृष्टशैल्यां भावपूर्णाः कथास्सन्ति।

**तर्कभाषासमीक्षणम्**- न्यायदर्शनविषयकस्य तर्कभाषेति ग्रन्थस्य संस्कृतव्याख्यां कृतवती लेखिका। एतेभ्योऽतिरिक्तं विविधभावेषु लिखितः उन्मेषः, लेखविषयकम्, अध्यात्मविज्ञानं, संस्कृतपत्रिकासु राष्ट्रियभावना, एता अपि संस्कृत-कृतयः सन्ति। हिन्द्यामपि चाण्डालकन्या, वन्दनवार, प्रथमरश्मि, नजराना, नीरवगाना, कल्लोलिनी, भारतरत्नजवाहर, मनमधुप, प्रभृतयो रचनाः वर्तन्ते।

**कथासप्तकम्**- कर्तव्यनिष्ठा कलरवश्चिन्ता च, अभिवर्धनं तनुः प्रत्नवस्त्रपोट्टलिका, मरणासन्नः शिशुश्च, सुषमायाः पत्रम्, अकृतार्थम् अविभावकत्वम् इत्येताः सप्तकथाः कथासंग्रहेऽस्मिन् विद्यन्ते। अत्र सामयिकी रूढिवादिता, परिव्याप्तविसंगतिः, भ्रष्टता, कर्तव्य-परित्यागः, स्वार्थसिद्धिः निरूपणमतीव समीचीनया रीत्या व्यधायि। कथासप्तकस्यास्य भाषा सरसा सरला सालंकारा प्रवाहमयी च विद्यते।

अद्य हि भारतवर्षे बहुशः कन्यकाः स्त्रियश्च संस्कृतभाषा-वाङ्मयाध्ययनें नितान्तं निरताः दृश्यन्ते। प्रायो वर्गेषु परीक्षासु च ताभिरेव सर्वोच्चस्थानानि लभ्यन्ते। पुरुषछात्राः पाश्चात्यप्रभावेण दिग्भ्रान्ताः पुरुषार्थचतुष्टये केवलम् अर्थसिद्धिमेवाथवार्थोपार्जनमेव यद्वा यत्र-कुत्रापि वेतनभोगित्वमेव स्वकीयस्य जीवनस्यैकमात्रं लक्ष्यं मन्यमानाः संस्कृताध्ययनाद्विमुखा भवन्ति। दौर्भाग्येन ते न जानन्ति यत्संस्कृतं नास्ति अर्थोपार्जनाय। संस्कृतं संस्कृतिः। अस्माकमतीत-गौरवस्य संवाहिकास्तीयं भाषा। भारतीयमानसस्य भारतीय-चारित्र्यस्य च सुसंस्काराय, मानवमूल्यानां पुनः संस्थापनाय, चेयं 'दैवी वाक् अन्वाख्याता महर्षिभिः' यथाह महानुभावो दण्डी।

उक्तं केनापि संस्कृतसंरक्षणे परेण महात्मना 'संस्कृतमस्माकं मातृवत् पूज्यम्।' को नु खलु खलः इच्छेत् स्वमात्रा केवलम् अर्थोपार्जनं कारयितुम्। सा तु नो जीवनं प्रदाय अर्थोपार्जनक्षमतां ददाति।

संस्कृतविमुखानां पुरुषछात्राणामदूरदृष्ट्या हानिः केषां- जायते? नूनं तेषामेव न कस्याप्यन्यस्य। हर्षस्य विषयस्त्वयमेव यत् संस्कृत-ज्ञान-विभूषिताः अद्यतनीयाः बहुसंख्याकाः कन्यकाः नित्यं नूतनाभिः रचनाभिः साहित्यसमृद्धिं कृत्वा भारतवर्षस्य साहित्याकाशे जाज्वल्यमानाः दृश्यन्ते। अद्यतनीया कन्याऽनागतस्य माता। अतो देशस्य पुनर्निर्माणाय चारित्र्यसंवर्धनाय सुरुचि-संप्रदानाय चेदं शुभलक्षणम्। एतासु डा. नलिनी शुक्ला अन्यतमा।

प्रस्तुतग्रन्थान्तर्गतासु सप्तसु तासु कथासु समकालीनजीवन-स्थानान्तरंगसूक्ष्मप्रसङ्गाः तथा रूपायिताः यथा लेखिकायाः वर्णन- शैली तेषु तेषु स्थलेषु दण्डिनः शब्दगुम्फनचातुर्यं स्मारयति। प्रसंगानुरूपा सतत-सहजबोधगम्या भाषापि तस्याः सन्निधौ वर्तते। प्राचीनया भाषया आधुनिकवस्तु-बोधकरणेऽपि सा प्रवीणा। यथा- 'शनैः शनैः प्राणेभ्योऽपि प्रियतरस्य भ्रातुस्तमसह्यमपि तीव्रतमं वियोगाग्निमन्तर्निगृह्य पुनरपि कर्तव्यैकव्रतः सोऽशिष्टानां पारि-वारिकानां पोषणप्रवृत्तो बभूव!'

क्रमशः.....

**असि. प्रो.-संस्कृत भगवानदीन आर्य कन्या स्ना. महाविद्यालयः, लखीमपुर-खीरी ( उ.प्र. )**
**एवं रिसर्च एसोसिएट भारतीय उच्च अध्ययन संस्थानं, शिमला**

# सप्तर्षिकाङ्ग्रेसानुसारेण १९७७ तमे वर्षे काङ्ग्रेसपराभवस्य मुख्यकारणानि

❑ नरेन्द्रसिंह चौहानः

महामहोपाध्याय-श्रीरेवाप्रसादद्विवेदाधुनिककविषु एको महाकविः वर्तते। महोदयः मध्यप्रदेशस्य सीरोहमण्डलान्तर्गत-नादनेर इत्याख्य ग्रामस्य निवासी वर्तते। महोदयः काशीहिन्दुविश्वविद्यालयतः सेवानिवृतो भूत्वा अधुना तत्रैव सम्मानिताचार्यपदं विभूषयन्ति। महोदयेन महाकाव्यानि अष्टकाव्यानि नाटकं चेति प्रायशः संस्कृतसाहित्यस्य सर्वासु विधासु रचनाः विहिताः। एतासु रचनासु एकं 'सप्तर्षि काङ्ग्रेसम्' नाटकमपि वर्तते। नाटकमिदं केन्द्रसर्वकारे १९७७ तमे वर्षे काङ्ग्रेसदलस्य पराभवः अर्थात् पराजयः कथम् अभवत् इति कथायामुपरि रचितं वर्तते। सम्प्रति सप्तर्षिकाङ्ग्रेसानुसारेण १९७७ तमे वर्षे केन्द्रसर्वकारे काङ्ग्रेसपराभवस्य मुख्यकारणानाम् उल्लेखः अधो-लिखितैः बिन्दुभिः क्रियते-

**(i) आपत्कालः** - यदा विपक्षिदलस्य नेतारः इन्दिरा विरुद्धम् आन्दोलनं कुर्वन्तः आसन् तदा इन्दिरा- देव्या तान् रोद्धुं २५ जून, १९७५ तमे वर्षे आपातकालो घोषितः। आपतकाले अनेके नियमाः आसन्। यथा सप्तर्षिकाङ्ग्रेसे-जानुकः आपतकालस्य वर्णनं कुर्वन् कथयति यत् ''यदा हि प्रतिबन्धितानि वृत्तपत्राणि नियन्त्रिता आकाशवाणी, परिहितं वाक्यस्वातन्त्र्यं निषिद्धानि राष्ट्रियस्वयंसेवकसंघप्रभृतीनि संघटनानि, निरुद्धाः जयप्रकाशनारायणः, मुरारजीदेशाई, राजनारायणः अन्ये चैवं प्रभृतयो राष्ट्रस्यास्य जननेतारः प्रभुकृताश्च आरक्षकाः तदा अज्ञातवास एव राष्ट्रस्य। अयं च विशेषः।''

**(ii) परिवारनियोजनम्**- काङ्ग्रेसदलस्य पराभवस्य परिवारनियोजनमपि मुख्यकारणमस्ति। सप्तर्षिकाङ्ग्रेसे अस्य वर्णनं एवं वर्तते। जानुकः कथयति- ''यदा संजयस्य सूत्रपञ्चकेन परिवारनियोजन- बलात्कारैरनेके वंशा उन्मूलिताः, निकृतशुक्रनाडिका युवानोऽपि भारैकवाहा बलीवर्दाः कृताः, प्रवेशिताश्च पारेसहस्त्रं मृत्युमुखं तदा कीदृशं तस्य नेतृत्वम्? सप्तर्षिकाङ्ग्रेसे एकत्र परिवारनियोजनस्य सन्दर्भे हेमवतीनन्दनबहुगुणाः आत्मनो विचारान् प्रकाशयति- ''सुशिक्षिता एव भवन्तः नाशिक्षिताः। भूयश्च साम्प्रतमाफालेन सन्तानस्य च क्रूरतमेन बीभत्सेन च मूलच्छेदेन किं वाऽवशिष्यते यत्र न शिक्षिता भवन्तः शासनेन। अधिकारिणां, शिक्षकाणां चिकित्सकानां च वेतनान्यवरुद्धानि तेषु प्रदेशेषु शासनेन परिवार-नियोजनस्य सुनियतां संख्यां पूरयितुम्।''

सप्तर्षिकाङ्ग्रेसे परिवारनियोजनस्य सन्दर्भे चरणसिंहः अपि स्वविचारान् प्रकटयति- ''विंशतिः सूत्राणि मातुः पञ्च च सूत्राणि पुत्रस्य इति पञ्चविंशति-सूत्रात्मके कार्यक्रमे बलात्कारेणापि योज्यन्तेऽधिकारिणः, परिवारनियोजनादिषु राभसीमिवापन्ना इमे विपर्यस्त-मतयः। परिवारनियोजने ममापि न नास्ति श्रद्धा। किन्तु नाहमत्र बलात्कारं सोढुं क्षमे।''

सप्तर्षिकाङ्ग्रेसे परिवारनियोजनस्य सन्दर्भे एकः रिक्शा-चालकः स्वव्यथां प्रकटयति- ''अस्म्यहं रिक्शा-चालकः। आनिशामुखं चालितया रिक्शया यदर्जितं तन्ममापि जठरं पूरयितुं न कल्पेत का कथा कुटुम्बस्य। अनियन्त्रितमूल्यं शासनमिदमविलम्बेन पातनीयम्। अन्यत् किं करिष्यति कालो ज्ञापयिष्यति? अस्मि च कर्त्तितशुक्रनाडिकः, रिक्शायामस्यां घण्टिकामात्रस्या-भावं व्याजीकृत्य रक्षाधिकृतैः। साम्प्रतं पुरुष एव न भवामि। केवलं श्वसिमि। मांसपिण्डमात्र-मस्मि स्त्रीनाम्नीनां शुनीनां परिभोगाय। हा हा काङ्ग्रेसो नाम वज्रसंपातोऽकिञ्चनेषु।''

सप्तर्षिकाङ्ग्रेसे परिवारनियोजनस्य सन्दर्भे कश्चित् साधुः स्वव्यथां प्रकटयति- ''अस्म्यहं साधुः। नारायण नारायण इति मे मन्त्रः। तमिमं जपन्नहं जयप्रकाश-नारायणस्य राजनारायणस्य वा भक्त इति केनचिदारक्षिणा कारासु पातितः।

साधुरपि मूर्खैरहं कृतो निकृत-शुक्रनाडिकः। नाहमिदानीं समर्थः समाधिमाधातुम्।''

सप्तर्षिकाङ्ग्रेसे शोभा माता च परिवारनियोजनस्य सन्दर्भे वार्ताः कुरुतः।

**शोभा-** पितः परिवारनियोजनं किं भवति ?

**माता-** तत्र अपण्डितस्ते पिता। कथय- किं वा कथयन्ति स्म ते शिक्षिकाः।

**शोभा-** कथयन्ति स्म प्रत्येकं शिक्षिकया पञ्च परिवार-नियोजन पत्राणि अवश्यं देयानि, अन्यथा वेतनं रोत्स्यते रोत्स्यते च वेतनस्य वृद्धिः।

**(ii) व्यक्तिवादः** - १९७७ तमे वर्षे काङ्ग्रेस-दलस्य पराजयस्य कारणेषु व्यक्तिवादः अपि एकं कारणं वर्तते। सप्तर्षिकाङ्ग्रेसे व्यक्तिवादस्य वर्णनमेवमस्ति।

मुरारजीदेसाई स्वभाषणे कथयति- ''इदं पुनः क्षते क्षारायते यदेकस्या व्यक्ते रक्षायै असंख्यातानां निरपराधानां देशभक्तानामज्ञातकारापातः। स्पष्टमिदं यद् साम्प्रतं देशेऽत्र व्यक्तिवादः प्रधानः, व्यक्तिवादो वा राजतन्त्रवादो वा नास्ति भेदः। वयं हि प्रजातन्त्रं कामयामहे।''

एकत्र सप्तर्षिकाङ्ग्रेसे अटलबिहारी वाजपेयी स्वभाषणे व्यक्तिवादस्य उदाहरणं प्रस्तौति- ''एवं हि आपातकालिकेन शासनतन्त्रेण प्रसाधितमिदं यद् इन्दिरातन्त्रं हि स्वार्थतन्त्रं, ममत्वतन्त्रम् उत्तराधिकारिभिः साधिततन्त्रं, धृतराष्ट्रतन्त्रं वेति।''

सप्तर्षिकाङ्ग्रेसे इन्दिराया विषये करपात्रस्वामी-महोदयः अपि स्वभाषणे कथयति- ''एवं च व्यक्तिविशेषानुकूलाचार एव साम्प्रतिकं राष्ट्रियं संविधानम्। सेयं महती क्रीडा जनतया सह।''

**(iv) अनियन्त्रिता मूल्यवृद्धिः** - अनियन्त्रित-मूल्यवृद्ध्या सर्वे जनाः पीडिताः आसन्। अतः इदमपि काङ्ग्रेसपराभवस्य कारणमस्ति। सप्तर्षिकाङ्ग्रेसे अनियन्त्रित मूल्यवृद्धेः उदाहरणम् एवं वर्तते-

जानुकसुन्दरकौ परस्परम् अनियन्त्रितमूल्यवृद्धि- सन्दर्भे वार्तां कुरुतः-जानुकः सुन्दरकं कथयति- ''नूनं बाल एवासि प्रवया अपि। यद्येवं तर्हि मूल्यवृद्धिः कथं भवति? कथं च नास्ति शर्करादीनां नियन्त्रणेष्वांशिकोऽपि निरोधः। षड्भिः रूप्यकैः किलोमात्रं शर्करा साम्प्रतमपि क्रीयते। येषामपत्यानि त्रिभ्योऽधिकानि तेभ्यः शासनाधिकृतेभ्यो विपणिभ्यः पर्याप्तमन्नमपि न दीयते, का वार्ता शर्करायाः। ततश्च येन कथंचिदुदरदरी पूर्यते तस्य कथं स्यादिदानीं निर्वाहः?''

सप्तर्षिकाङ्ग्रेसे एकः रिक्शाचालकः स्वव्यथाम् एवं प्रकटयति- ''अस्म्यहं रिक्शाचालकः। आ निशामुखं चालितया रिक्शया यदर्जितं तन्ममापि जरठं पूरयितुं न कल्पेत का कथा कुटुम्बस्य। अनियन्त्रितमूल्यशासनं इदम् अविलम्बमेव पातनीयम्।''

**(v) जगजीवनरामादीनां लोकप्रियनेतॄणां काङ्ग्रेसदलात् बहिर्गमनम्-** इन्दिरायाः आपत्कालेन जगजीवनरामः हेमवतीनन्दनबहुगुण च एतौ अपि प्रभावितौ जातौ। एतयोः काङ्ग्रेसदलात् त्यागपत्रेण जनता प्रभाविता अभवत्।

सप्तर्षिकाङ्ग्रेसे आकाशवाणीतः वार्ता प्रसारिताः- ''इयमाकाशवाणीवार्ता। अद्य खलु बाल्यात् प्रभृति काङ्ग्रेसमेव सेवितवान् जगजीवनरामः काङ्ग्रेसस्यैव प्राथमिक्याः सदस्यतायाः त्यागं घोषितवान्। तेनैव साकं उत्तरप्रदेशस्य मन्त्रिपदाच्च्यावितः कुशलमतिः हेमवती-नन्दनबहुगुणोऽपि कांग्रेसं त्यक्त्वा स्वातन्त्र्यं भेजे। काङ्ग्रेसपरित्यागे कारणं च आपत्कालस्य समाप्तिः जगजीवनरामः पूर्वमप्यनेकशः प्रधानमन्त्रिणमन्वरुद्ध समापयितुमापत्कालम्। अश्रुत वचनश्च प्रजातन्त्रस्य सत्वं रक्षयितुं छिन्नां नावमिव काङ्ग्रेसं त्यक्तुमसौ बाधितः। इति।''

अतएव जगजीवनरामादीनां लोकप्रियनेतृणां काङ्ग्रेस-दलस्य त्यागेन जनताया उपरि अत्यधिकः प्रभावो जातः। काङ्ग्रेसस्य पराभवे इदमपि प्रमुखं कारणमासीत्।

**(vi) सञ्जयस्योपरि इन्दिरायाः निरंकुशता** - आपत्काले सञ्जयः गान्धी आपत्कालस्य अधिकारान् नकारात्मकरूपेण स्वीकृतवान्। अस्य प्रयोगं कृत्वा सः

मन्त्रिसमूहात् प्रभृति जनतां यावत् मानसिकअत्याचारं कुर्वन् आसीत्। सञ्जयगान्धी काङ्ग्रेसदलस्य वृद्धमन्त्रिजनान् तृण-समं अपि न मन्यते स्म।

सप्तर्षिकाङ्ग्रेसे राजनारायण: स्वभाषणे सञ्जयस्य विषये कथयति- ''सञ्जयस्याकालिकेन मेघोदयेन भीषिता: सर्वेऽपि वृद्धा: कांग्रेसमन्त्रिण:।''

सञ्जयगान्धिन: पार्श्वे किमपि पदं नासीत् तथापि सञ्जयगान्धी तस्मिन समये शक्तिशाली नेतृरूपेण समक्षं आगत:। जनताया उपरि अस्य नकारात्मक प्रभाव: जात:।

सप्तर्षिकाङ्ग्रेसे जगजीवनराम: सञ्जयस्य विषये कथयति- ''अस्ति च सम्प्रति देशेऽस्मिन् स्वयंभू: प्रधानमन्त्री यो हि इन्दिरादेवीमपि तृणायापि नो गणयति। स च सञ्जय:। अस्ति हि अनाकलित-देशकालस्य सञ्जयस्यैव साम्प्रतं शासनाधिकारिषु प्रभुत्वम्। काष्ठपुतलका: सर्वे य इमे वृद्धा मन्त्रिण:।''

अतएव वयं कथयितुं शक्नुम: यत् 1977 तमे वर्षे काङ्ग्रेसपराभवस्य एकं कारणं सञ्जयोऽपि आसीत्।

**( vii ) जयप्रकाशनारायणस्य लोकप्रियता:-** जयप्रकाशनारायणस्य आन्दोलनस्य पश्चात् आपत्काले स: कारागारे क्षिप्त:। कारागारे एव तस्य वृक्क रोग: जात: तेन स: जनतायां लोकप्रिय: जात: अनेन अपि काङ्ग्रेसदलस्य उपरि नकारात्मक: प्रभाव: जात:। सप्तर्षिकाङ्ग्रेसे राजनारायण: स्वभाषणे जयप्रकाशस्य विषये एवं वदति- ''लोकनायको जयप्रकाश: सर्वस्वमपि देशाय पणीकृतवान्। तस्याप्यस्य महापुरुषस्य वृक्कयुग्मं कारागृहे शासनेनानेन विकृतं कृतमिति स्वयं जयप्रकाश एवं कथयति। तदानीमेवाऽसौ मोचितो यदास्य वृक्के पूर्णतया विकृते। साम्प्रतमसौ लोकानुद्बोध-यितु-मपि न क्षम:। एवंविधस्य महात्मन: कृते यदीयमेवं क्रूरा तदा तस्य वान्यस्य कृते स्यादियमुदाराऽऽशया?''

अत: लोकनायकजयप्रकाशस्य लोकप्रियता अपि काङ्ग्रेसपराभवस्य एकं कारणं वर्तते।

**( viii ) अदोषाणां कारागृहे पातनम्-** कस्यचित् जनस्य कोऽपि अपराध: नास्ति तथापि स: कारागृहे निक्षिप्यते स्म। अनेन अपि जनता क्रुद्धा। इदमपि पराभवस्य कारणमस्ति।

**( ix ) वृत्तपत्राणि प्रतिबन्धितानि-** आपत्काले 'प्रेस' इति अस्योपरि 'सेंसर' इति आसीत्। अत: सम्यग्रूपेण वृतान्त: जनताया पार्श्वे न आगच्छति स्म अत: जनता अनेन पीडिता आसीत्।

सप्तर्षिकाङ्ग्रेसे राजनारायण: वृत्तपत्राणां विषये स्वविचारान् प्रकटयति- ''भ्रातर: प्रजातन्त्रं हि देशस्यास्यादर्शभूतं तन्त्रम्। अस्मिन् जनतैव स्वस्य कृते स्वकीयान् प्रतिनिधीन् शासनाय निर्वाचयति। विचार-स्वातन्त्र्यमस्य परमं लक्षणम्। कारागारतो निर्मुक्तेन मया निवेद्यते साम्प्रतमपि आकाशवाणी वृत्तपत्राणि च स्वातन्त्र्येन अशासकीयान् विचारान् प्रकाशयितुं न प्रभवन्ति।''

**( x ) आकाशवाणी नियन्त्रिता** - १९७७ तमे वर्षे आपत्काले आकाशवाणी नियन्त्रिता। अनया कोऽपि स्वस्य वार्तां जनताया पार्श्वे न प्रेषयितुं शक्नोति स्म। अत: सर्वे अनया संपीडिता: अत: इदमपि एकं पराभवस्य प्रमुखं कारणमासीत् काङ्ग्रेसदलस्य १९७७ तमे वर्षे।

सप्तर्षिकाङ्ग्रेसे महात्मागान्धिमहोदयस्य ध्वनि- संग्रहे आकाशवाण्या उपरि वार्ता एवमस्ति- ''आकाशवाणी कांग्रेसस्यैव नाम जपति। क्रीतदासीयमिन्दिराया: वृत्तपत्राणि निर्जीवानि, तेषु न प्रकाश्यन्ते निर्भयमस्माकं विचारा:। इदमेव यदि राज्यं तर्हि पारतन्त्र्येण किमपराद्धमिति न शक्नोमि ज्ञातुम्। न च शक्नोमि ज्ञातुं स्वातन्त्र्यमिदं पारतन्त्र्यत: किमिव भिन्नमिति।''

अतएव वयं कथयितुं शक्नुम: यत् १९७७ तमे वर्षे काङ्ग्रेसदलस्य पराभवस्य उपरिलिखितानि सर्वाणि कारणानि प्रमुखानि आसन्। मन्ये एतादृशोऽयं लेख: जिज्ञासु पाठकानां कृते रुचिकरो भविष्यति इति।

**व्याख्याता**
**राजकीय उच्च माध्यमिक विद्यालय:,**
**मसूदा, अजमेर ( राज. )**

# संस्कृतनाटकपरम्परा

❑ डॉ. रामेश्वरप्रसादगुप्तः

'काव्येषु नाटकं रम्यं' इत्युक्त्यनुसारं नाटक-विधा काव्येषु श्रेष्ठा वर्तते। प्रथमः नाट्याचार्यः 'भरतमुनिः' इति विश्रुतम्। सर्वजनहिताय आचार्यभरतमुनिना नाट्यसंरचना कृता। वेदाः नाट्यस्य-उद्गमाः सन्ति। अस्मिन् विषये उल्लिखितमस्ति यत् सर्वदेवाः ब्रह्मदेवम् अवदन् यत्-भगवन् ! लोकरंजनाय एकं क्रीडनीयकं रचयतु भवान्। तदा ब्रह्मणा नाट्यरचना कृता। यथोल्लेखः वर्तते यत्-

**''प्रणम्य शिरसा देवौ पितामह-महेश्वरौ।**
**नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम्।।''**

नाट्यशास्त्रम् 1-1

नाट्यं तु सर्वश्राव्यमस्ति। यथा कथितमस्ति-

**''वेदमन्यत्ततः स्त्रक्ष्ये सर्वश्राव्यं तु पञ्चमम्।''**

नाट्यशास्त्रम् 1-14

नाट्यवेदः पञ्चमवेदः मन्यते। नाट्यं तु सर्वशास्त्र-सम्पन्नमस्ति। यथा कथितम् अस्ति यत्-

**''सर्वशास्त्रार्थसम्पन्नं, सर्वशिल्पप्रवर्तकम्।**
**नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम्।।''**

नाट्यशास्त्रम् 1-16

नाट्यसंरचनाविषये वेदाः प्रमाणरूपेण सन्ति। यथा-नाट्यशास्त्रे एव निगदितं यत्-

**''एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन्।**
**नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।''**

नाट्यशास्त्रम् 1-17

तथा च-

**''जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।''**

नाट्यशास्त्रम् 1-18

अपि च-

**''वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना।**
**एवं भगवता सृष्टो ब्रह्मणा सर्ववेदिना।।''**

नाट्यशास्त्रम् 1-19

अनेन स्पष्टमस्ति यत् नाट्योद्भवः वेदेभ्यः मन्यते। ऋग्वेदे संवादसूक्तानि सन्ति। संस्कृतनाटकानां मूलाधारः संवादाः सन्ति। ऋग्वेदे यम-यमी, पुरुरवा-उर्वशी, सरमा-पणिः, इन्द्र-इन्द्राणी, इन्द्र-मरुत्, विश्वामित्र-नदी इत्यादि-संवादाः सन्ति। अभिनयाय संवादानां मुख्य-भूमिका अस्ति। एवमेव नाट्योत्पत्तिविषये अनेके सिद्धान्ताः सन्ति। यथा-वीरपूजासिद्धान्तः, प्रकृति-परिवर्तनसिद्धान्तः, पुत्तलिकासिद्धान्तः, छायानाटक-सिद्धान्तः, विकासवादी-परम्परासिद्धान्तः इत्यादयः सन्ति।

नाटक-संरचना पाणिनिकालतः पूर्वं प्रचलिता अभवत्। आचार्य-पाणिनिना (चतुर्थशताब्दी ई.पू.) 'अष्टाध्यायी' इति स्वरचनायां 'पराशर्यशिलालिम्यां भिक्षुनटसूत्रयोः' (अष्टाध्यायी 4-3-110) इत्यस्मिन् सूत्रे नटसूत्रम् अर्थात्-नाट्यशास्त्रं प्रयुक्तम्। अनेन स्पष्टमस्ति यत् पाणिनिसमये नाट्यरचनापरम्परा प्रचलिता आसीत्। महर्षिपतञ्जलिना 'महाभाष्ये' (3-2-111) कंसवधः बलिवधश्च इति नाटकद्वयम् उल्लिखितम्। तत्समयस्य नाट्यशाला 'छोटानागपुर' इति स्थाने प्राप्ता। नाट्य-परम्परा तु इयम् अनवरतरूपेण प्रचलिता अस्ति। भासः, शूद्रकः कालिदास इत्यादयः प्राचीनाः नाट्यकाराः विश्रुताः वर्तन्ते।

संस्कृतनाट्यपरम्परायाः स्वर्णिमसमयः महाकवि-कालिदासतः प्रारभ्यते। कालिदासः स्वयमेव विश्वविश्रुतः नाट्यरचयिता। अस्य 'अभिज्ञान-शाकुन्तलम्' इति नाटकस्य विषये इयं सूक्तिः प्रसिद्धा अस्ति। यत्-

**''काव्येषु नाटकं रम्यं , तत्र रम्या शकुन्तला।**
**तत्रापि च चतुर्थोऽङ्कः, तत्र श्लोकचतुष्टयम्।।''**

महाकविकालिदासस्य ''अभिज्ञानशाकुन्तलम्'' तु अद्भुतं नाटकम् अस्ति। कालिदासस्य परवर्ती-समये भवभूतिः, विशाखदत्तः, भट्टनारायणः, मुरारिः, शक्तिभद्रः, दामोदरमिश्रः, राजशेखरः, क्षेमेश्वरः, दिङ्नागः, कृष्णमिश्रः, जयदेवः, श्रीहर्षः, वत्सरातः, पं. मथुराप्रसाददीक्षितः इत्यादयः नाट्यकाराः तु अभवन्। ते प्रसिद्धाः सन्ति एव। महाकविभवभूतिना विरचितम् उत्तररामचरितं नाटकं तु नाट्यकलायाः चूडान्तनिदर्शनम् अस्ति। अस्मिन् विषये कथितं यत्-

**'उत्तरे रामचरिते भवभूतिर्विशिष्यते'।।**

आधुनिकसमये नाटकसंरचना-परम्परा सुचारुरुपेण प्रचलति एव। आधुनिकनाट्यकारेषु डॉ. वेङ्कटराघवः, देवर्षिः कलानाथशास्त्री, डॉ. राधाबल्लभत्रिपाठी, डॉ. रमाकान्तशुक्लः, पं. सुधाकरशुक्लः, डॉ. राजेन्द्रमिश्रः, डॉ. श्रीनिवासरथः, डॉ. मोहनगुप्त इत्यादयः नाटककाराः विश्रुताः वर्तन्ते।

अधुना संस्कृतसाहित्यस्य विविधविधासु रचनाकार्यं सुचारुतया प्रचलति नाट्यविधा अपि सुसम्पन्ना अस्ति। वर्तमानकाले अस्माकं देशे भारतवर्षे विविधाः पत्र-पत्रिकाः प्रकाशिताः भवन्ति। पत्रिकासु नाटकसंरचनाः दृश्यन्ते एव। डा. राधाबल्लभत्रिपाठिमहोदयेन 'नाट्यम्' इति पत्रिकायाः प्रकाशनम् अनवरतं क्रियते। अस्याः पत्रिकायाः प्रकाशनं सागरविश्वविद्यालयस्य माध्यमेन भवति। पत्रिका इयं नाट्यरचनासम्बन्धिसूचनां सम्यक् रूपेण प्रकाशयति प्रसारयति च।

अस्तु, संस्कृतनाट्यपरम्परा प्राचीनकालतः अद्यावधि सुचारुतया प्रचलति। अधुनापि अनेके काव्यकाराः संस्कृतनाटकसंरचनां कर्तुं प्रवृत्ताः वर्तन्ते। संस्कृतभाषा अमरभाषा अस्ति। संस्कृतभाषामाध्यमेन विविधकाव्यविधासु संरचनाकार्यं सृष्टिपर्यन्तं भविष्यति एव इति दृढविश्वासः अस्ति।

**श्रीमतीलक्ष्मीगुप्ता भवनम्, उद्योगविभागस्य समीपे, सिविललाइन्स, दतिया ( म.प्र. )-475661**

# वसन्तः

❑ पं. कृष्णगोपाल ब्रजेशः

वासन्तिकी समुपागता वेला!
अयि ! जागृहि सीमन्तिनि, प्रत्यूष-कान्तिश्चागता।
वन्यश्रीः संचरत्यमधुना, वासन्तिकी समुपागता वेला।
किसलयाञ्चल-चटुल-चञ्चल-छवि-हर्ष-कर्ष-विमोहिता,
रसाल-वन-संचारिणी, कोकिला केलिरता।।
वासन्तिकी समुपागता वेला।
अयि ! द्विरेफ ! धम्मिल्लेषु-गुम्फितेषु एषु च।
सुझंकृतिं तनोतु रे परिगुञ्जनं करोतु रे।
रविकर-निकर संस्पर्श-स्फुट-नवमल्लिका समुपागता।
वासन्तिकी समुपागता वेला।।
याम्य-दिगनिल-प्रसरणं सारसैः समुदीरितम्।
कीर्तितं शुक-शावकैः पलाश-पुष्प-निवेशनम्।।
इति वदति-नियति-नितम्बिनी, निम्ब तरुतल-मधिगता।। वासन्तिकी समुपागता वेला।।
गौर-ग्राम वधूटिका वट-वाटिकासु विलासिनी,
सुहासिनी मृगचारिणी ग्रामश्रीनिवासिनी।
पथिक-जन-मन-तोषिणी दधिकूर्चिका चाङ्गीकृता।
वासन्तिकी समुपागता वेला।।
अयि जागृहि कविलेखनि, तूलिकासंचारिणी,
सरस-रस-मयि शारदे ! कमनीयदे ! परिबोधदे !
सारस्वतैरधिरोहिता। वासन्तिकी समुपागता वेला।।

**''कृष्णायनम्''**
मिलापनगर, 193, अरविन्दमार्ग,

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# संस्कृत-गजल-सङ्ग्रहः

काव्यजगति गीतिरचनाया एका लोकप्रिया विधाऽस्ति ''ग़ज़ल'' नाम्नी या हि मूलत उर्दूभाषायाः सृष्टिरस्ति किन्तु सम्प्रति भारते प्रायः सर्वासु भाषासु प्रणीयते तस्यां मुक्तककविता, पाकिस्तानादिमुस्लिमदेशेषु तु स्वाभाविक्येव तस्यां काव्यरचना। संस्कृतेऽपि प्रायः सार्धशताब्दीतस्तस्यां विधायां काव्यसर्जनं विधीयमानमस्तीति सुमहद् विस्मयकारकं तथ्यम्। इतोऽप्यधिकं विस्मायकं तथ्यमिदमस्ति यद् बहुभिः शोधविद्वद्भिर्घोषितमस्ति यद् गतायां शताब्द्यां ग़ज़लसर्जनमुर्दूत इतरासु भाषासु यदवधि समारब्धं तत्र सर्वप्रथमं ग़ज़लगीतिः संस्कृतभाषायामवतीर्णा, तदनु सिन्धी-गुजराती-प्रभृतिभाषासु, तदनन्तरं हिन्दी-भाषायाम्। अद्य हि प्राञ्जलहिन्दीभाषायाः ग़ज़लकाव्य-कर्तारो दुष्यन्तकुमार-सूर्यभानुगुप्तप्रभृतयो ये प्रसिद्धास्ते विंश्याः शताब्द्या मध्येऽभूवन्, संस्कृते ग़ज़ललेखका भट्टमथुरानाथशास्त्रिप्रभृतयस्तु विंश्याः शताब्द्याः प्रारम्भे (ततः पूर्वमपि च) स्वरचितानि ग़ज़लगीतानि प्राकाशयन्। तदवध्यद्यप्रभृति ग़ज़लगीतयः प्रणीयन्ते संस्कृते इति विदन्त्येव मर्मज्ञाः।

सुमहतः प्रमोदस्यायं विषयो यद् भारतस्य मूर्धन्यया सहित्यसंवर्धनसंस्थया दिल्लीस्थया साहित्यअकादम्या संस्कृतग़ज़लकाव्यरचनानामेकः संग्रहः सपद्येव प्रकाशितः। ''द्राक्षावल्ली'' शीर्षकवहेऽस्मिन् संग्रहे सुपरिचितेन कविवर्येण डॉ. हर्षदेवमाधवेन सङ्कलितानि षड्विंशतेः 26 कविवर्याणां संस्कृतगजलगीतानि प्रकाशितानि। सर्वप्रथम-गजलसर्जकं भट्टश्रीमथुरानाथ-शास्त्रिणमारभ्य नवयुवकं ऋषिराजजानी-पर्यन्तं 26 कवीनां द्वित्राणि गजलगीतान्यारभ्य विशंतिपर्यन्तं प्रत्येकं कवेः रचना मूलरूपेणाऽत्र मुद्रिताः, तासामुत्सग्रन्थाना-मुल्लेखोऽपि कृतः। किं स्यादेषां ग़ज़लकाराणां पौर्वापर्यम्? एतत्कृते सङ्कलयित्रा सुरक्षितोऽयं मार्गश्रितो यदायुःक्रमेण ते संनिवेश्येरन्।

ग़ज़लगीतिष्वेतासु सर्वविधानि छन्दांसि (बहर इति प्रसिद्धानि) परिदृश्येरन्, विविधाश्च विषया विलोक्येरन्। ग़ज़लविधायाश्छन्दःशास्त्रं मात्रिकविधया, गीतिप्रसार-परिगणनया पृथगेव प्रचलतीति जानन्त्येव काव्यरसिकाः। भट्टमथुरानाथशास्त्रिभिस्तु स्वकीये काव्यसंग्रहे (साहित्य-वैभवनाम्नि) विविधानां प्रकाराणां (बहर) लक्षणानि, गणनिकषादीनि (अराकान) च विवृतान्य-भूवन्। परवर्तिभिरन्यैरपि काव्यशास्त्रकारैः (अभिराज-राजेन्द्र-मिश्र-राधावल्लभत्रिपाठिप्रभृतिभिः) ग़ज़ल-सिद्धान्तस्य संक्षिप्ता चर्चा कृताऽभूत्। संक्षिप्तस्तथाविधः परिचयोऽस्य सङ्कलनस्य आङ्गलभाषानिबद्धायां स्वकीयभूमिकायां डॉ. हर्षदेवमाधवेनाऽपि प्रस्तुतोऽस्ति, ग़ज़लविधां सोमरस-निषिक्तसुरापेयरूपेण चित्रयता ग़ज़लगीतीनां प्रारम्भे रचयितॄणां जन्मतिथिरपि सूचिता (न निधनतिथिः) अन्ते संक्षिप्तपरिचयः सङ्केतश्च।

ग़ज़लगीतीनामिदं सङ्कलनं संस्कृतसाहित्यसौधस्य नूतनमेकं प्रकोष्ठं परिचाययति प्रमाणयति च यत्संस्कृत-कवयो जागरूकास्तिष्ठन्ति सर्वेषु युगेषु। अत्र सङ्कलिताः प्रायशः सर्वा अपि गीतयो ग़ज़लविधायाश्छन्दःशास्त्र-मनुसरन्ति, गेयताया निकषेऽपि शुद्धप्राया दृश्यन्ते। कतिपयनवीनकवीनां ग़ज़लानुहारिणीषु गीतिषु लयस्य तदनुसरणं यदि न दृश्यते यद् गेयतायाः कृते आवश्यकं, ग़ज़लच्छन्दोविधानस्य परिचयो वा न तेषु प्रमाण्यते तर्हि न विशेषतः काऽपि हानिः, ''अपारे काव्यसंसारे कविरेव प्रजापतिः। यथाऽस्मै रोचते छन्दस्तथैव परिवर्तते।'' इति विधानमनुमन्यमानैरस्माभिस्तत्र न कार्यः क्षोदक्षेपप्रहारः, स्वागतं च मुक्तहस्तैर्विधेयमस्य नूतनस्य संस्कृतकाव्य-संग्रहस्य। वर्धापयामः सङ्कलयितारं सम्पादकं च डॉ. हर्षदेवमाधवं, साधुवादैरभिनन्दयामश्च केन्द्रीयां साहित्य अकादमी संस्थां प्रकाशनस्यास्य कृते।

**द्राक्षावल्ली (संस्कृतग़ज़ल सङ्कलना) सम्पा. हर्षदेव माधवः, प्रका. साहित्यअकादमी, रवीन्द्रभवनं, 35, फीरोजशाह मार्ग, नई दिल्ली पृ.सं. 245 मू. 300/-**

**स्मृतिग्रन्थः**

वाराणसेये महात्मा गांधी काशीविद्यापीठे 37 वर्षाणि संस्कृतविभागाध्यक्षपदमधितस्थुषां (1960-1997)

राष्ट्रपतिसम्मानितानां भारतविश्रुतानां विद्वत्प्रवराणां श्रीमतां प्रो. अमरनाथपाण्डेयानां स्वर्गारोहणं 27 अक्टूबर (2015 ई.) दिवसे समभूदिति स्मरेयुः संस्कृतसेविनः। 6 अक्टूबर 1937 दिवसे जनिं लब्धवता विदुषाऽनेन संस्कृते काव्यरचना कृता, संस्कृते हिन्द्यामाङ्गल्यां च बहवो लेखाः लिखिताः, शतशश्छात्राः पाठिताः, सम्मानादिकमधिगतम्। एतेषां स्मृतयेऽर्घ्यं समर्पयितुं सुविशालः समर्हणीयश्च यः स्मृतिग्रन्थः सपद्येव प्रकाश-माप्तस्तस्याभिधानमस्ति ''अमरयशः सौरभम्।''

विद्वर्येण प्रो. प्रभुनाथद्विवेदिना सम्पादितेऽस्मिन् त्रैभाषिके ग्रन्थे पञ्चसु खण्डेषु चरितनायकस्य परिचयोऽपि समुपलभ्यते, तद्विरचिताः कृतयोऽपि संचित्य कतिपयाः सङ्कलिताः सन्ति, भारतप्रसिद्धानां विदुषां शास्त्रीयाः शोधलेखा अपि मुद्रिताः सन्तीति सङ्ग्रहणीयत्वमस्य सुतरां स्फुटीभवति। प्रारम्भे राज्यपालादीनां कुलपतीनां च शुभाशंसा मुद्रिताः सन्ति, तदनन्तरमुच्चपदधारिभिः प्रो. पाण्डेयाय प्रेषितानि कतिपयपत्राणि मुद्रितानि, तदनु 44 विदुषां (येषु बहवस्तेषां शिष्याः सन्ति) संस्कृते, हिन्द्यामाङ्गल्यां च पाण्डेयवर्यविषये संस्मरणानि श्रद्धाञ्जलयश्च प्रकाशिताः। ततो भाषात्रये एव पाण्डेयमहाभागानां कतिपयाः कृतयो मुद्रिताः सन्ति (14)।

विपुला शोधात्मकलेखसामग्री ग्रन्थेऽस्मिन् भारतप्रसिद्धैर्विद्वत्प्रवरैर्भाषात्रये लिखितानां विविधानां शास्त्रीयविषयाणां विवेचकैः पाण्डित्यपूर्णैर्निबन्धैः प्रस्तुताऽस्ति। एवंविधाः 79 शोधात्मका विविधैर्विद्वद्भि-र्विलिखिताः लेखा व्यापकं शास्त्रीयविषयफलकं विवेचयन्तीति स्फुटमेव ग्रन्थोऽयं चिरस्मरणीयः सञ्जातः। परिशिष्टेषु प्रो. अमरनाथपाण्डेयस्य जीवन-विवरणं , कृतित्वविवरणं च मुद्रितमस्ति यत्र तेषां लेखाः, भूमिकाः, तैर्लब्धाः सम्मानादयः, तैः प्रसारिता आकाशवाणीवार्ता अपि सूचीबद्धा दृश्यन्ते, यत्र-यत्र सभा-सम्मेलनादिषु ते समगंस्त, तद्विवरणमपि प्रस्तुतमस्ति। ग्रन्थस्यास्य समादरः संस्कृतसेविसमाजे सुभृशं प्रवर्तिष्यते इति साधुवादैः सभाजयामोऽस्य सम्पादनमण्डलीयान्, प्रकाशनसहायकान् प्रबन्धकांश्च।

**अमरयशःसौरभम् (प्रो. अमरनाथपाण्डेयस्मृति-ग्रन्थ) सम्पा. प्रो. प्रभुनाथ द्विवेदी, प्रका. शारदा संस्कृत-संस्थान सी 27/59 जगतगंज, वाराणसी, पृ. सं. 750 मू. 2500/-.**

**प्रेरकप्रसङ्गशतकम्** **अष्ट चत्वारिंशः प्रसङ्गः**

# साधुपुरुषसान्निध्यम्

**❑ श्रीमती आराधना धर्माधिकारी**

राजगृहनगरे एको रौहिणेयनामकश्चौरो निवसतिस्म। तस्य पिता मृत्युसमये तं शिक्षितवान्-यदि स्वकार्ये सफलो भवितुमिच्छसि तदा यत्र महात्मनां साधूनामुपदेशः प्रवचनं स्यात् पुराणकथाप्रवचनं वा स्यात्तत्र नैव गन्तव्यम्। गन्तव्यमेव भवेच्चेत् कर्णौ पिधातव्यौ। एकदा स कुत्रापि गच्छन्नासीत्। तेनावलोकितं मार्गे बहवो जनाः एकत्रिताः सन्ति। समीपे गमनेन ज्ञातं महावीर स्वामिन उपदिशन्तीति। कर्णौ पिहिते तथा पि वाक्यद्वयं तस्य श्रोत्रयोरागतमेव। तेजोमयशरीर-त्वाद्देवानां छाया नैव पतति, तेषां चरणौ च भूमित-श्चतुरङ्गुलमुपर्येव तिष्ठतः। स त्वरितमेव ततः पलायितः।

कतियदिनानन्तरमेव स चौर्यापराधे धृतः। राज्य-कर्मचारिणस्तं बहुदिनेभ्य एवान्वेषयन्तिस्म। परं स न कस्यापि परिचितः, स स्वपरिचयं च नैव ददातिस्म। अधिकारिणस्तस्मै एतादृशीमौषा धिमददुर्यया स मूर्च्छितोभूत्। ते जनास्तमेकस्मिन्नुपवने स्थापितवन्तः। यदा तस्य मूर्च्छा दूरीभूता परितः समवलोक्य स विस्मितः उपवने अद्भुताः वृक्षाः, बहुमूल्यवस्त्राभरणैरलङ्कृताः गायन्त्यो नृत्यन्त्यो महिलाश्चासन्। तास्तमवदन्- देव सौभाग्यमस्माकं यद् भवान् स्वर्गे समागतः। कृपया कथयतु मर्त्यलोके भवान् केन नाम्ना विख्यात आसीत्। तेन चिन्तितं किमहं स्वर्गेऽस्मि, किमेताः देव्यः? स महावीरस्वामिनो वाक्यं स्मृतवान्-एतासां तु छाया पतति चरणौ च भूतलस्थावेव। तेन ज्ञातमेतत्त्वारक्षिणां जालमेव। अथापि स उच्चैरकथयत्-आम् अहमेवास्मि अरुणः परं यस्य वाक्यद्वयेनैतावाँल्लाभः, तदुपदेशानु-सारमेव जीवनयापनं कर्त्तुमिच्छामि। तस्य जीवने च महत्परिवर्तन-मभूत्।

**ब्रह्मपुरी, जयपुरम्**

लघुकथा-

# अवाञ्छितः

मूल लेखिका बेला मुखर्जी

❑ अनुवादकः - डॉ. सत्यव्रत वर्मा

उषस्येवोत्थितो 'दत्त' महाशयः। यत्सत्यं निश्यपि तस्य सुष्वापो नाभूत्। शटयामधितिष्ठतस्तस्य नेत्रे कदाचित् न्यमीलतां क्षणान्तरे चोदमीलताम्। स वाराणस्याः प्रथितयशा धनाध्मातश्च लेखानिष्णात आसीत्। स तथा स्वकर्मणि व्यासक्तोऽभूद् यथा क्षणमपि क्षणं नाविन्दत्। अत्याधुनिके समृद्धे चोपनगरे तस्य भव्यमनन्यलभ्यं च हर्म्यं महार्घाणि कारयानानि चासन्। अध्ययनकाले स व्युत्पन्नश्छात्रोऽवर्तत परं सन्तानद्वयी तस्य षोडशीं कलामपि नास्पृशत्। आत्मजः कलया मन्दबुद्धिरासीद् आत्मजा च द्वादशीं कक्षामपि नोत्तरीतुमशक्नोत्। जाया नीता सर्वात्मना किटी-क्लबेऽभिरतासीत्, स च ग्राहकेभ्योऽवकाशं नालभत। इत्थं स्थिते सन्ततेरायतिम् अनुमातुमशक्यं नासीत्। अन्यथापि सा (सन्ततिः) पितुरदभ्रे धने बद्धभावासीत् न पितरि। हर्म्यस्य प्रथमे तले तस्य कार्यालयः आसीत् संश्लिष्टे कक्षे च शय्या। श्रान्तः सन् स तामेवाध्यशेत। सेवकः प्रभाते तत्रैव कल्यवर्तं प्रापयामास यज्जग्ध्वा स कार्य आत्मानं व्यापारयामास। नीता त्विदानीं यदाकदैव दर्शनमगात्।

नवं परिधानं परिधाय स बहिर् निरगमत्। सर्वत्र तिमिरं प्रासरत् 'अजान' ध्वनिश्च दूरतोऽश्रूयत। द्वारमुद्घाट्य स उद्याने पदमकरोत्। शीतो वातप्रवाहस्तस्य भालं तथाचुम्बद् यथा ममत्वावतारभूता जननी सुतं शिरसि जिघ्रति। अनायासं दत्तमहाशयस्य मुखाद् दीर्घो निश्वासो निस्सृतः।'भूयांसि वर्षाणि जनन्या दृष्टायाः।' स मुख्यद्वारान्निष्क्रान्तो हस्तसंकेतेन टैक्सीयानमाकारयत्, चालकस्य च गन्तव्यं स्थानं न्यगदत्। सर्वरात्रं स्वप्तुं न प्राभवदिति याने निद्रामितः। कियच्चिरं सुप्त इति न वेद सः, परं सुप्तोथितो यानम् इलाहाबादस्य राजपथे न सञ्चरमाणम् अद्राक्षीत्। अनतिचिरेण टैक्सीयानं ग्रामस्थस्य गृहस्य पुरस्तात् प्रपन्नम्।

आः! गृहं परितः प्राकारः कदा प्रकल्पितः?... द्वारमपावृत्य स गृहं प्राविक्षत्। तत्रैकोऽज्ञातपूर्वो जन आलोके न्यपतत्। न तादृशमिदं गेहं यादृशमुज्झित्वाहं गतः। दत्तमहाशय आश्चर्यस्य परां कोटिमध्यरोहत्। स रथ्यायां दृशं प्रैररित्। आ! एषा वज्रचूर्णेष्टिकादिभिः परिष्कृता! यदाहं छात्रोऽभूवमियमन्यादृशी आसीत्। द्विचक्रिकापि पदे पदेऽत्रास्खलत्। परं साम्प्रतं टैक्सीयानमप्यप्रतिहतं गृहस्य पुरतः प्राप्तम्। विंशतिवर्षैः सर्वं विपर्यस्तमत्र।

तस्मिन्नहन्यपि शीर्णप्रायस्यास्य गृहस्याजिरे एतादृश एव सुखद आतपः प्रासरत्। अहं ग्रामप्रधानस्य पितृवर्य्यदयाशंकरमहाभागस्य पुरस्ताद् अस्थाम्। स कोपाध्मात आसीत्। अहं धर्मपरायणेषु तेषु किञ्चिद् (अयुक्तम्) अब्रवम्। मातानारतम् अरोदीत्। कपाटावृताया उमायाः सगद्गदो रोदनारावो मे कर्णशुष्कल्योरपतत्। रुदती माता मामप्राक्षीत् केन दुष्प्रेरितस्त्वं सर्वनाशं वरयसि वत्स। षाण्मासिकं गर्भं वहन्त्या उमायास्त्वं विवाहसम्बन्धं विच्छेत्तुमीहसे ! ब्रूहि, किं तेऽपकृतं तया?

अम्ब! सा मया किमपि साम्यं न बिभर्ति। एनं विवाहमनुच्छिद्याहं तेषां दुहितरमुद्वोढुं नालम्। असति चास्मिन् परिणये उच्चाध्ययनार्थं मम विदेशगमनम् अशक्यम्। एतां ग्रामटिकामधिवसन्नहं स्वीयमनागतं विनाशयितुं नेहे। बहु प्रापणीयं मया जीवने।

''नाहं विवाहच्छेदमनुमन्ये। त्वमकालहीन गृहान्निर्याहि, अत्र च पुनः पदं न देयम्। अस्मात्क्षणा-देवाहम् अपुत्रो जातः''

अहं पितुः परुषं वचोऽन्तराक्षिपन्नवोचं- मामन्यथा न गृह्णातु भवान्। मम भविष्यं सकलं जीवनं संशयमापन्नम्।

''मद्वचः शासनादेशमप्यतिशेते। वीतचिन्तो भव। मदीया स्नुषा स्वादेयं (अधिकारं) याचितुं तव पुरतो हस्तं न प्रसारयिष्यति-त्वां नोपैष्यसि। यत्र वा तत्र वा याहि।''

अधर्मं मा चर वत्स! प्रभुरपि त्वां न क्षमिष्यते, माता साग्रहमभाषीत्। चतुर्वर्षीयस्तनयः सत्वरमागत्य मामश्लिष्यत् (पर्यष्वजत) परमहं तमपि सन्यक्कारं पराकुर्वम्। प्रणोदनेन शिशुर्भुवि पतितः क्षतश्च। कोणे स्थिता तज्जननी अकालक्षेपेण तमुत्थाप्योत्संगेऽकरोत्।

ततः प्रभृति अनाभ्यन्तरोऽहं जातः। अद्य विंशत्या वर्षाणां पश्चाद् गृहं प्रत्यागतोऽहं परं कोऽपि न माम् अभिजानाति।

कं द्रष्टुमीहसे त्वम् ? एका कोकिलकण्ठी मधुरं ब्रुवाणा हस्तेन पुष्पकरण्डिकां च दधाना तस्य पुरतोऽस्थात्। पितृचरणा अजिरे खट्वामध्यास्य जनैः सम्भाषन्ते स्म। अधुनात्राजिरमेव नास्ति, कुत्र तिष्ठेयुस्ते?

अहम्.... अहम्..... ।

अपि पितामहीं दिदृक्षसे ?

अपि साम्प्रतं गृहनियमाः परिवृत्तिमिताः? पितृचरणान् विहाय मातृचरणान् पश्यन्ति जनाः।

आम्.... आम्।

एहि, पितामहीम् आह्वयामि।

'पितामही।' शब्दमिमं श्रुत्वा स आमूलं प्राकम्पत। अपि सैवेयं बाला या तदा भार्याया गर्भे आसीत्? स इदानीं सुरुच्या समलंकृतेऽत्याधुनिके विशाले बाह्यकक्षेऽतिष्ठिपत्। युवती विद्युद्व्यजनमचालयत्, अन्यं कक्षं च गन्तुं प्रवृत्ता। तदैव सोऽभाषीत्- किं तेऽभिधानम्?

सोनाक्षी!

विंशत्या वर्षैर् ग्रामः सर्वात्मना विपर्यस्तः। रथ्याः सुदर्शा जाता, विद्युच्चागता। तदैव द्वारप्रतिसीराकम्पत।

त्वमसि ?

जननीं विलोक्य स व्यामूढ इवाजायत। निस्नाता पावनी मूर्तिः। तद्वपुरुत्थितो गन्धः कुसुम-सौरभमप्यतिशेते स्म। परं यदा दृक् तस्याः शून्यसीमन्तेऽपतत् स हतप्रभोऽभूत्। सिन्दूरस्थाने तस्या भाले पीतचन्दनतिलक आसीत्। किं पितृचरणा दिवं प्रयाताः? अहमन्त्येष्टिक्रियार्थमपि नाकारितः? अम्बा सहजमवादीत्-याहि, उमां ब्रूहि चाय प्रेषयेति, प्रातराशसाधने चात्मानं प्रवर्तयस्व।

तमवलोक्य मातुराननं सुतरां भावशून्यमासीत्। निर्विण्णेव सा पुरःस्थे दीवानाख्ये पर्यङ्के बद्धासनातिष्ठत्।

किमर्थमायातस्त्वम्? अप्यस्ति किमपि कार्यमत्र ?

रुद्धकण्ठः सोऽब्रवीत्-नहि एवमेव (आयातः)।

धृतिमवर्धाय सोऽप्राक्षीत्-पितृचरणाः.... कदा?

त्रयो वत्सरास्तस्योपरतस्य। सोनया इण्टरकक्षोत्तीर्णा सम्प्रति च सा स्नातककक्षायामधीते।

अपि बाह्य छात्ररुपेण?

अम्बा कर्कशदृशा तमद्राक्षीत्- न हि बनारसविश्वविद्यालयेऽध्ययनरतेयम्। छात्रावासमधिवसति। अवकाशेऽत्रायाता। विजयः (बिज्जू) तस्मिन्नेव विश्वविद्यालये चिकित्साशास्त्रं परिशील्य भिषगो जातः। उभौ सुतरां निष्णातावध्ययने। वाग्देव्या अनुग्रहोऽस्ति। विजयः स्वर्णपदकमविन्दत् सोना च चित्रकलायां नैकान् पुरस्कारानध्यगच्छत्।

मातुर्वदने गर्वकान्तिं वीक्ष्य स उपहत इवाजायत। इमौ मे बालौ स्तः। तदैव मनस्तमध्यक्षिपत् नात्र तेऽधिकारः। अयमधिकारस्त्वयेतो विंशत्यां वर्षेषु हारितः। सुता तदा मातृगर्भेऽभूत्। विंशतिवर्षेभ्य

ऊर्ध्वमायात:, कालेन चात्र सर्वं परिवर्तितम्। अहमपि तु परिवर्तित:। अस्य गेहस्य तदानीन्तन आत्मजोऽजयो गृहं परिहायागमत्, अद्य वाराणसेयानां लेखाविदां सत्तमोऽजयदत्तो गृहं प्रत्यागमत्।

चायम्.....

उमां वीक्ष्य स विस्मयमगात्। विंशतिवर्षैरपि तस्यां कोऽपि विशेषो न दृश्यते। चिकनशाटिका, शिरसि तदञ्चलं, करयो: स्वर्णकंकणद्वयं सीमन्ते च सिन्दूरम्। अपि साधुनापि हृदयेन मां पतिं मन्यते? तं संदृश्योमापि विस्मिता परं साकालहीनम् आत्मानं पर्यवस्थापयत्। तदैव मात्रोक्तं, स्नुषे, याहि, कल्यवर्तं च प्रकल्पय।

चायं निपीय स प्रात्यग्र्य-परीतो जात:। आहा, एलाभावितं चायम् ? अम्बाया: पृच्छा कथं समाधेया? श्रान्त: सन्नेव शान्तिनीडमायातो निर्वृतये, परं तन्नीडमपि नावशिष्यते। मुष्टे: सिकता इव तस्यास्तित्वं विगलितमिव तं प्रत्यभात्। माता बालौ प्रति सचिन्तासीत्। वध्वा: पितृपक्षे पूर्वमेव कोऽपि नासीत्। मातुलस्तस्या विवाहं प्राकल्पयत। परित्यक्तां वधूमभिलक्ष्य तस्या हृदयं नितराम् अरुजत्। सा कृषिकर्मणि मनोऽधत्त। भगवत्कृपया कृषिभूमिरिदानीं त्रिगुणिताऽभूत्। बालावपि सुधियौ स्त:। तयोर्वाग्दानं सम्पन्नम्। वर्षेण विवाहोऽपि सम्पत्स्यते।

सोना प्रातराशमादायायाता। शुद्धघृतस्य गन्धेन कक्षो निर्भृत:। तस्याभिमतमासीत् तद् भोजनम्। अशनायार्त-मिवात्मानं सोऽन्वभूत्। आ: स्मृतम्! ह्यो नक्तं न भुक्तं मया नीतया सह कलहकारणात्। सा स्वैरमाचरति। सुतापि तस्या अनुगा जाता। तस्या: कदाचरणमपि सा कवचवत् त्रायते मां चासभ्यं मन्यमाना भूयसा गर्हते। अपरेद्यु: सुता (ऐनी) सख्युर्विवाहे यामीत्युक्त्वा गृहान्निष्क्रान्ता। निशीथे मादकद्रव्याणि सेवमाना: केचिद् युवानो निरुद्धा:। ममात्मजापि तेष्वेकासीत्। यथा-कथञ्चित् सा गृहमानीता। परं तज्जननी तस्यां तथा भावार्द्रं व्यवहरद् यथा तया किमप्यसन्न चेष्टितम्। तद्धि मे धैर्यध्वंसायाभूत्। मया चिन्ता प्रावर्ति किमीदृशाय जीवनायैव मया सर्वस्वम् उज्झितम् ?

चायम् आदास्यते भवान्? सोना पुरस्ताद् अतिष्ठत्।

आ:। आम्। एकं चषकं कुरु, वत्से।

सोना चायमकरोत्, अम्बा च तमप्राक्षीत्-कथं यास्यसि?

किं माता मां गन्तुम् इङ्गयति ?

सर्वं दिनं यानं मय्येव स्थास्यति।

साधु ! गन्त्रीविरामस्थलं (स्टेशनं) दूरेऽस्ति। बसयाने जनसम्मर्दो भवति। वृष्ट्या राजमार्ग एकस्मिन् स्थाने भग्न:, इत्युक्तं विजयेन। तेनानस्तंगते सूर्ये त्वया प्रस्थेयमित:।

गृहाद्बहिरेकं मोटरसाईकलयानं विरतमिति तेन ध्वनिनाज्ञायि। स तत्रापश्यत्। एकं सुदर्शनं युवानं गृहं प्रविशन्तं सोऽद्राक्षीत्। तं वीक्ष्य स्वीया युवावस्था तस्य स्मृतिमारूढा। शिष्टाचारमनुरुध्य स युवा तं प्राणमत् मातरं प्रति च प्रत्यावर्तत। मातापि तयो: परिचयं कारयितुं सोत्साहा नादृश्यत।

अम्बा तं भूयसा परिचितमेव मन्यमाना कक्षान्तरं प्रायात्। कक्षात: तेषां परिहास: संलापश्च तत्र विशदम् अश्रूयताम्। ... तस्यागमनेनात्र किमप्यन्यथा नाभूत् सर्वं च पूर्ववत् समपद्यतेति प्रतीयते स्म। एकवादनेऽ-म्बागत्यावादीत्-भोजनं साधितम्। भुङ्क्ष्व। चालकाय भोजनं प्रेषितम्।

तूष्णीक: सोऽन्त: प्राविशत्। विशालो भोजनकक्ष:। उमा भोजनमादाय तत्रोपातिष्ठत। विशाले पात्रे निहितं भोजनं तदिष्टमेवाभूत्। सहसा सोऽस्मार्षीत्-विवाहानन्तरं रहो लब्धुं स भृशम् अकामयत। पितरौ तत्रैव न्यवसताम्। तेन व्यचिन्ति-उमा मां रुन्ध्यात् किञ्चित् पुरावृत्तं च स्मारयेत् परं किञ्चिदपि तन्नाभूत्। उमा निर्विकारं भोजनं पर्यवेषयद् यथा सान्यस्मै अभ्यागताय करोति। तस्या

वदने सम्मानभावः काममासीत् परमनुरागस्य लेशोऽपि तत्र नालक्ष्यत।

सोऽप्राक्षीत्- अपि कुशलिनी त्वमुमे!

कुशलं मे! बालयोर्विवाहानन्तरं सुतरां वीतचिन्ता भवितास्मि। उमा तु तं कुशलमपि नापृच्छत्, परं भोजने सर्वं तत्साधितं तया, यत्तस्य प्रियमासीत्।

त्वं.... किञ्चित्.... न वक्ष्यसि उमे।

किं वच्मि। बालौ सुधियौ व्युत्पन्नौ चेति भृशं प्रसीदामि। उमाया मुखमण्डलं गरिम्णा व्याभात्। अहो भाग्यम्। तेनाशिक्षितप्रायाया उमायाः पुरस्तात् लन्दने कृतोच्चशिक्षं लेखापारिणं धनवन्तं श्रीमन्तम् अजयदत्तं सुदूरं पराजयत। उमा सगर्वा समादृता च मातासीत्, स च पराजितोऽवधीरितश्च पिता।

प्रत्यावर्तमानो यदा स ग्रामसीमानमतिक्रान्तवान् तस्य नेत्राभ्याम् अजस्रम्, अश्रुधारा प्रवृत्ता। अद्य यावत् स्वीय-आश्रयः आसीत्, योऽधुना विनष्टोऽपुनरागमनाय। जननी तमेकवारमपि तस्यां स्थातुं नोक्तवती न च बालयो-र्विवाहे निमन्त्रितवती। 'जाया' उमापि तं साग्रहं न किञ्चिदवोचत्। कस्यचिदपि हृदि मदर्थं स्नेहलवो न वर्तते। अहमत्रावाञ्छितोऽस्मि। तेन तत्रैव गम्यं यत्र मम धनं तु सर्वैरिष्यते। सोऽश्रूणि प्रमृज्य वैवश्याद् वाराणसीं प्रति प्रस्थितः।

**डॉ. सत्यव्रत वर्मा**
(राष्ट्रपति-सम्मानितः)
पूर्व-प्राचार्यः, मानद प्रोफेसर
7/34, पुरानी आबादी, नामदेव फ्लोर मिल के पास,
श्रीगंगानगरम्-335001 (राज.)

# मातृकृतं गर्भस्थशिशुस्तोत्रम्

❑ **डॉ. हर्षदेवमाधवः**

ब्रह्माण्डक्रोडान्मम शून्यक्रोडं
वरेण्यसूर्यान् नय दीपतेजः।
शरच्छीतांशोर्भव सौम्यज्योत्स्ना
मद्वंशवृक्षस्य नवः प्ररोहः।।
हे सत्यनारायण ! त्वं सदंश-
श्चैतन्यशक्त्याः परमश्चिदंशः।
आनन्दकन्दोऽसि निरञ्जनोऽसि
मद्गर्भमागच्छ चिदात्मदेव !
त्वं कुहूकारैर्भर मे कुलायं
त्वद् भाषया त्वं मुखरां कुरु माम्।
प्रसूनहास्यं वदनेऽस्तु नित्यं
चाञ्चल्यमस्तु त्वयि निर्झराणाम्।।
ददामि तुभ्यं हृदयस्य स्पन्दं
गतिं ददामि रुधिरस्य तुभ्यम्।
उषा शुभा नौ मधुराश्च स्वप्ना
भूतार्थतां यान्तु मनोरथास्त्वयि।।
सृजन्तु प्राणाः ! तव प्राणतत्त्वं
सृजन्तु भूतास्तव देहरूपं
कुर्वन्तु देवा अमृतांशचित्तं
सरस्वती ते सृजतु सुबुद्धिम्।।
गन्धः पृथिव्या बलमस्तु वायो-
स्तेजो रविचन्द्रमसोस्त्वदीयम्।
आपश्च दिव्या ददतु रसस्ते
ददातु वाणीं शुभदां च व्योम।।
पावित्र्यमस्तु सरितां च धैर्यं
सदा नगानां, मुदितां घनानाम्।
क्षमां पृथिव्यास्सवितुश्च दीप्तिं
बृहस्पते बुद्धिमवाप्नुहि त्वम्।।
पितामहो जीवति त्वां हि प्रेक्षितुं
पितामही वाञ्छति खेलनार्थम्।
त्वन्नामसङ्कीर्तनचिन्तया च
पितृष्वसा ताम्यति हे चिदात्मन्।।
त्वया विना मे विधुरं हि गेहं
मज्जीवनस्यापि प्रयोजनं न।
रत्नं महार्हं मम गर्भदेव !
प्रसीद त्वं धारय नामरूपम्।।
मनोरथा मे सफलीकृतास्त्वया
जाताः कृतार्था मम तीर्थयात्राः।
जाता प्रतिष्ठा कुलदेवताया
गर्भालयो मे प्रिय ! देवमन्दिरम्।।
पुण्योदयो नौ कथमद्य जातो
मातृत्वभवो मयि जायते यत्।
शुभाशिषां किं फलमद्य प्राप्तं
देवैः प्रदत्तो वरदानराशिः।।

8, राजतिलक बंग्लोज, आबादनगरं,
बस स्टॉपसमीपे, बोपल, अहमदाबाद

**श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-** **चतुर्विंशः प्रसङ्गः**

# भारती तेषामेव प्रेरणापुष्पम्

❑ वेणीमाधव गो. धर्माधिकारी

राजस्थान प्रान्त कार्यवाहकाः श्रीमन्तो गिरिराजशास्त्रिणो वर्णयन्ति-1950 ई. वर्षे जयपुरीये संघशिक्षावर्गे श्रीमन्तो बाबासाहेब आप्टे महोदयाः दिनत्रयं स्थिताः। अहं शेखावाटी क्षेत्रे प्रचारकः आसम्। पारिवारिकपरिस्थितिवशान्मे गृहे परावर्त्तनमभूत्। बाबामहोदयेन यदेदं ज्ञातं तदा तेऽकथयन् साधु यदि त्वं परावृत्यागतस्तर्ह्येवं कुरु, जयपुरनगरतः एकं मासिकं पत्रं संस्कृते प्रकाशय। जयपुरं हि संस्कृतस्य केन्द्रम्। अत्र संस्कृत- विदुषां महती संख्या निवसति। इतः किञ्चित्समयात्पूर्वं यथा तथा संस्कृत पत्रिकाप्रकाशनं सरलमेव। यदा तेषामत्यधिकाग्रहेणेदं कार्यं कर्तुं स्वीकृतं मया तदा अपरस्मिन् दिने एव नगरस्य प्रमुख संस्कृत विदुषामधिवेशनमायोजितम्। अस्मिन् भट्टमथुरानाथशास्त्रिणः, सुरजनदासस्वामिनः, पं. वृद्धिचन्द्रशास्त्रिणः प्रमुखा आसन्। एतेषां समक्षं संस्कृत-मासिकपत्रिकाप्रकाशनं प्रास्तावयम्। तदा सर्वैरेव ग्राहकसंख्याया अभावे पत्रिकायाः प्रकाशनं सुस्थिरं नैव भवति इत्यापत्तिः कृता। श्रीबाबामहोदयाः अवदन् ग्राहकसंख्यायाः भारः मयि त्यज्यताम्। इदं कार्यं त्वहं स्वयमेव करिष्यामि। भवता तु केवलं नियमितं प्रकाशनं विधीयताम्। तदैव सर्वैर्लेखादिप्रदानरूपा स्वीकृतिः प्रदत्ता। सुरजनदासस्वामिना सम्पादिता च प्रथमा भारती दीपावलिपर्वणि 1950 वर्षे प्रकाशिताभूत्। प्रथमे वर्षे एव चास्याः सहस्रप्रायाः ग्राहका अभवन्। अग्रिमे वर्षत्रयेऽपि च ग्राहकवृद्धिरभूत्। तेषामेव कृपायाः आशीर्वादस्य फलमद्यावधि भारती नियमितरूपेण प्रकाशिता भवति।

1953 वर्षेऽहं पत्रिकायाः प्रचारार्थमुत्तरप्रदेशे प्रवासार्थं निर्गतः। अयोध्यायां संघकार्यालये एकः सज्जनो मिलितः। अहं भारत्याः प्रचारार्थमागतोऽस्मीति ज्ञाते त्वरितमेव तेन वार्षिकं शुल्कं निष्कास्य मह्यं प्रदत्तम् ग्राहकश्च समभवत्। मया पृष्टमपि किं भवता संस्कृतमधीतम्? त्वरितमेव तेन कथितं नैव मया संस्कृतं नाधीतम्। अधुनैव बाबामहोदयाः प्रवासे इत आगताः तैः संस्कृतस्य महत्वं वर्णितं भारतीग्राहकत्वं चाङ्गीकर्त्तु च कथितम्। अत एवाऽहं ग्राहकः संजातः। श्रुत्वा महदाश्चर्यं मयानुभूतम्।

## संघः सम्यगवगतः

इस्वीये 1945 तमे वर्षे यदा बाबामहोदयानां जयपुरे आगमनमभवत् तदा जयपुरे दशैकादश संघशाखाः कार्यरता आसन्। कार्यक्रमार्थं सर्वशाखानामेकत्रीकरणमायोजितमासीत्। संस्कृत-महाविद्यालयस्य प्रधानाचार्याः महामहोपाध्यायाः श्री गिरिधर शर्मचतुर्वेदिनः ये हि समस्ते भारते प्रख्याताः प्रवक्तारः आसन्, देशस्य सुविख्यातेषु संस्कृतविद्वत्सु येषां गणनासीत्, तैरध्यक्षत्वं स्वीकृतम्। श्रीबाबामहोदयानां भाषणानन्तरं यदा ते वक्तुमुत्थितास्तदा तेषां प्रथमं वाक्यमिदमेवासीत् कतिपय-वर्षेभ्यः संघविषयेऽनुकूलप्रतिकूलसमाचारान् शृण्वन्नासम्, परमद्य तस्यैकेन मुख्याधिकारिणा संघः सम्यगवबोधितः। मम भवद्भ्यः सर्वेभ्योप्याग्रहोऽस्ति यदिदं हिन्दुसंगठनात्मकं कार्यं स्वस्य पूर्णां शक्तिं प्रयोज्य वर्द्धयन्तु।

## मया तस्य कृते कृतमेव किम्?

1972 ई. वर्षे संघशिक्षावर्गात्पूर्वं बाबामहोदयानां राजस्थानस्य विभागस्थलेषु प्रवास आसीत्। उदयपुरे वयमुपविष्टाः सायंकालीनं जलपानं कुर्वन्त आस्म। तदा तत्रैकः कार्यकर्त्ता प्रश्नमकरोत्-बाबामहोदय! भवतां कनिष्ठो भ्राता तुल भवद्भ्योतीव क्रुद्धः। यदा यदा भवन्तोऽत्रागच्छन्ति वयं तमाग्रहं कुर्मस्तदा स क्रुद्धो भूत्वा कथयति- 'नहि नास्ति में कोऽपि भ्राता। अहं नैव वाञ्छामि केनापि मिलितुम्।' अत्याग्रहपूर्वक-मस्माभिरस्य कारणं पृष्टम् तदा ते अवदन् बन्धो! यदाऽहं सेवाकार्यं कुर्वन्नासं तदा मे एकाविधाभगिनी, मम माता एष लघुभ्राता चासीत्। यः प्राथमिककक्षासु पठन्नासीत्। अहं सेवाकार्यं गृहं च त्यक्त्वा संघप्रचारकः समभवम्। महता कष्टेन मम भगिन्या गृहसंचालनं कृतम्। मम लघुभ्रातापि महत्कष्टपूर्वकमधीतवान्। अतएव स रूष्टोऽस्ति।

तदाप्रभृत्येवास्माभिर्ज्ञातं संघकार्यस्य विस्तारार्थं कियत्या कठोरतया व्यक्तिगतेच्छानां पारिवारिकसुखानां च तैः परित्यागः कृतः।

**ब्रह्मपुरी, जयपुरम्**

# आचार्य डॉ. नारायणशास्त्रिकाङ्कर-कथा-साहित्य-विहगावलोकनम्

❑ डॉ. अनीता अग्रवाल

संस्कृत-साहित्यं बहुविधं विद्यते। प्राचीनं तु असीमितमात्रायां वरीवर्त्ति एव, परन्तु अर्वाचीनम् अपि ततः न्यूनं न अस्ति। गद्य-साहित्यं पद्य-साहित्यं च विपुलं मिलति। म.म. राष्ट्रपति-सम्मानित-पं. श्री नवलकिशोर-काङ्कर-ज्येष्ठात्मजः स्वयम् अपि राष्ट्रपति-सम्मानितः जयपुर-निवासी आचार्यः डॉ. नारायणशास्त्री काङ्करः यत्र संस्कृते काव्यकारः, निबन्धकारः, नाटककारः वैयाकरणः च विद्यते तत्र कथाकारः अपि सर्वविदितः अस्ति एव। आधुनिक-संस्कृत-कथाकारेषु अयम् अपि उल्लेखनीयः मन्यते। साम्प्रतम् अपि सप्ताशीतिवर्षीयस्य अस्य विदुषः भगवत्याः शारदाम्बायाः परमया कृपया लेखनी अविरतं चलन्ती एव विलोक्यते।

एतदीयं कथा-साहित्यम् 'अभिनव-संस्कृत-कथाः', अभिनव-संस्कृत-कथा-पञ्चाशिका, '१३०-संस्कृत-कथाः' एतन्नामकेषु प्रकाशितेषु पुस्तकेषु प्राप्यते। अस्मिन् कथा-साहित्ये सर्व-विषय-सम्बन्धिताः कथाः सन्ति, यथा (क) विमात्रा सम्बन्धिता कथाः - १. अवमानितः नरेन्द्रः, २. वराकी विमला ३. विमाता, ४. अत्यद्भुतं वैमातृकं वात्सल्यम्, ५. अतीत-स्मृतिः, ६. माता मिलिता।

(ख) संस्कृते तत्प्रचार-प्रसाराभ्यां च सम्बन्धिताः कथाः- १. श्रीमान् शास्त्री महोदयः, २. हस्ति-दन्ताः, ३. विद्या विनयेन शोभते, ४. वृद्धः संस्कृत-शिक्षार्थी।

(ग) देशप्रेम्णा सैनिकैश्च सम्बन्धिताः कथाः- १. द्वा सुपर्णा, २. रक्षाबन्धनं सैनिकाश्च, ३. परमवीर-सैनिकः।

(घ) पुनर्विवाहेन विधवाभिः एवम् अन्य-सामाजिक-समस्याभिः सम्बन्धिताः कथा- १. स्त्री-हृदयम्, २. पुनरावृत्तिः, ३. मध्यस्थता, ४. शौर्यस्य पुरस्कारः, ५. दुर्दान्तः दस्युराजः, ६. उत्कोचः पतिव्रता पत्नी च, ७. हतभाग्यः शशिमोहनः, ८. कर-चौर्यम्।

(ङ) युवकैः वृद्धैश्च सम्बन्धिताः कथाः- १. कर्त्तव्य-परायणः द्राक्तरः, २. सुलक्षणा वधूः, ३. न्यायकारी निदेशकः, ४. आदर्शः शिक्षकः, ५. अनुपमः मल्लः, ६. ईदृशौ अपि श्वश्रू-श्वशुरौ, ७. पितामही मिलिता।

(च) मातुलेन सम्बन्धिते कथे - १. मातुलस्य चमत्कारः, २. यदा मातुलः पराजितः।

(छ) मृत्युना सम्बन्धिते अपि द्वे एव कथे- १. जीवितः शवः, २. यदा अहं मृतः।

(ज) प्रकीर्ण-विषयैस्तु सम्बन्धिताः कथाः- प्रचुराः सन्ति एतासु काश्चन इमाः सन्ति- १. अमङ्गले अपि मङ्गलम्, २. वरं कार्श्यं स्थौल्यात्, ३. अकालः अपि सुकालः, ४. परिवर्त्तनम्, ५. प्रक्षिप्तम् अपि पुनः प्राप्तम्, ६. धन्यः ग्रहस्थाश्रमः ७. छिन्ने मूले नैव शाखा न पत्रम्, ८. प्रयाग-प्रसादः, ९. स्वर्णिमः सन्देशः, १०. मातुः शिक्षा, ११. पौरुष्य-परीक्षा, १२. गृह-स्वामिनी, १३. हृदय-परिवर्तनम्, १४. नलिनी १५. शिव-सङ्कल्पः, १६. यथा कर्म तथा फलम्, १७. शावक-स्नेहः, १८.एकः कालः सदा नहि।

आसां कथानां समनुशीलनेन एवं तु कथयितुं शक्यते एव यद् इमाः कथाः समाजस्य दर्पण-रूपाः सन्ति। भाषा आसाम् इयती सरला वर्त्तते यत् सामान्य-संस्कृतज्ञः अपि एतद्-रसास्वादनतः वञ्चितः स्थातुं न शक्नोति। सर्वाः अपि कथाः नैतिक-शिक्षा-प्रदायिकाः देशभक्ति-समुत्पादिकाः सच्चारित्र्य-शिक्षिकाश्च वर्त्तन्ते। आसु अश्लीलतायास्तु नाम कुत्रापि न विलोक्यते। अत्र अनेकाः कथा जयपुरस्थेन आकाशवाणीकेन्द्रेण प्रसारिताः तथा समये-समये श्रोतृभिः श्रुताः एव भवेयुः। बहुभिः कथाभिस्तु कथा-प्रतिस्पर्धासु प्रथम-स्थानं लब्ध्वा परितोषिकम् अपि उपार्जितम्। किम् बहुना ?

**अध्यापिका**
**रा.उ.प्रा.सं.वि., मानसरोवरं, जयपुरम्**

# साहित्ये शब्दार्थयोः बोधः

❑ अरुण शर्मा

संस्कृतवाङ्मये साहित्यशब्दस्य प्रयोगः तत्र क्रियते यत्र काव्यभेदतत्स्वरूपतद्गतरसदोषगुणालङ्कारादिनिरूपणं क्रियते। काव्यनिरूपणप्रसङ्गे एव तद्विभावादिरूपतया नायिकानां नायकानां च भेदा अपि प्राप्तनिरूपणा भवन्ति। तेन तदप्यस्य शास्त्रस्याङ्गभावं भजते। साहित्यशास्त्रम् अलङ्कारशास्त्रं काव्यशास्त्रमित्यादि नाम्ना ज्ञायते स्म। नवीनयुगे अयं शब्दः अलङ्कारशास्त्रकाव्यशास्त्राद्यपेक्षया अधिकप्रचलितः वर्तते। अस्य श्रेयः चतुर्दशशताब्द्याः आचार्यविश्वनाथं प्रति गच्छेत्। तेन स्वग्रन्थनाम 'साहित्यदर्पणम्' कृतम्। ग्रन्थस्यास्याध्ययनाध्यापनप्रणाली बह्वधिकप्रचलिताऽभवत्। अत एव काव्यसौन्दर्यविवेचकशास्त्रस्य कृते 'साहित्य' शब्दः अधिकप्रचलितो जातः तथा अलङ्कारशास्त्रं, काव्यशास्त्रं, काव्यालङ्कार इत्यादिशब्दाः न्यूनतामुपगताः। आचार्यविश्वनाथात् पूर्वमेकादशशताब्द्यामलङ्कारसर्वस्वकाररुय्यकोऽपि 'साहित्यमीमांसा' नाम्ना व्यापारग्रन्थे 'साहित्य' शब्दस्य प्रयोगं कृतवानासीत्। परञ्च तस्याऽयं ग्रन्थः अधिकप्रचलितः नाऽभवत्। अत एव काव्यशास्त्रस्य कृते 'साहित्ये' शब्दप्रचारस्य श्रेयः विश्वनाथायैव गच्छति। परञ्च आचार्यविश्वनाथः अस्य शब्दप्रयोगस्य आदिप्रवर्तकः न, अस्य आदिमूलं तु काव्यशास्त्र-स्याद्याचार्यस्य भामहेन काव्यालङ्कारे प्राप्यते। आचार्यभामहेन स्वग्रन्थारम्भे एव ''**शब्दार्थौ सहितौ काव्यम्**''1 एवं काव्यलक्षणं कृतम्। अर्थात् शब्दार्थयोः साहित्यं काव्यमिति। शब्दार्थस्य अर्थात् साहित्यस्याभिप्रायं दशमशताब्द्यां वक्रोक्तिजीवितकारः आचार्यकुन्तकः लिखति-

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः।।2**

अस्यानुसारं काव्ये सौन्दर्याधानस्य कृते शब्दार्थयोः मनोहारिणी स्थितिर्नाम साहित्यं वर्तते। अर्थात् शब्दार्थयोः परस्परं समन्वयः भवेद् न्यूनाधिक्यं न भवेदिति। वक्रोक्तिजीवितकारः कुन्तकः शब्दार्थयोः साहित्यं स्वकाव्यलक्षणे समावेशयति-

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।3**

शाब्दबोधस्य अनेकानि रूपाणि सन्ति। प्रत्येकस्मिन् काव्याङ्गे तदुपलब्धेः। कथमिति चेदुच्यते क्रमेण। प्रथमं तावद्रसक्षेत्रे शाब्दबोधप्रक्रिया वर्ण्यते-

**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति**4रिति भरतसूत्रम्। लोके विभावानुभावव्यभिचारिणां दृश्यमाणं स्वरूपं भरतस्याभिमतमस्ति। तेषां दर्शकानां रसानुभूतिः भवति इति। काव्ये पुनः श्रव्ये विभावादीनापुमस्थितिः कविप्रयुक्तशब्दमाध्यमेनैवाभिमता। शब्दात्मकत्वादेव तेषां तत्र श्रव्यमात्रस्वरूपं सिद्धयति। महाकाव्यादौ शब्दश्रवणमात्रेणैव तदनुगतचिद्वृत्तेः तादात्म्येन साधारणीकरणं जायते। साधारणीकरणकालेऽपि भग्नावरणत्वं चिदः स्वीकृतम्। तदपि मूलतस्तु शब्दस्य सामान्यरूपेण वक्त्रौचित्यविवक्षापरित्याग एव। न तु चिद्वृत्तेः परिवर्त्तनम्। परिवर्तनमिति चेत् तदा तु

1 काव्यालङ्कारः- १/१६
2 वक्रोक्तिजीवितम्- १/१७
3 वक्रोक्तिजीवितम्- १/७
4 नाट्यशास्त्रम्-६/३२, वृत्तिः

रसानां स्थायिविशिष्टचिदानन्दात्मकतैव न भविष्यति। परिवर्तनक्रमे अस्थायित्वोपलब्धेः। एवं सकला प्रकिया शब्दत्वस्यैवात्रेति स्पष्टम्। चिदावरणभंगपरिकल्पनायां व्यञ्जनयेवावरणभङ्गोपपत्तेः अपि शब्दमहत्ता सुस्थिरा। यतो हि पूर्वमेवास्माभिः व्यञ्जनायाः शब्दविषयता दारिद्र्येन प्रतिपादिता। शब्दशक्तित्वाच्च तदभिमतेऽप्येवं शाब्दज्ञानेनैव सा सम्भवति। अत एव पण्डितराजसदृशैः विद्वद्भिः काव्यात्मकशब्दोपपत्तिमत्त्वाच्चिवद्भुतेः शाब्दत्वं प्रत्यक्षसुखविषयकत्वाच्च अपरोक्षात्मिकत्वं स्वीकृतम्। कश्चित्तु रितिविशिष्टचिदानन्दस्वरूपत्वं रसस्याभिमतम्। तत्रापि रतेरनिर्वचनीयप्रातिभासिकत्वं शब्दोपपन्नमेव स्वीकार्यम्। काव्ये सहृदयहृदयगततद्भ्रमेऽपि शाब्दज्ञान-प्रसक्तेः। एवं रसस्य व्यङ्ग्यत्वमर्थरूपता उपपत्तेः स्वापेक्षयान्यतरत्वं स्यात्। तच्च तदवस्थायां भविष्यत्येव न। तस्मान्न तदौचित्यमित्यस्माकं मतम्।

अथालङ्काराणां शाब्दबोधविषयत्वमुच्यते। अलङ्कारक्षेत्रे शब्दमहत्त्वं पूर्वप्रतिपादितम्। तत्र शब्द-विशेषेणैवालङ्कारनिर्णयः सम्भवतीत्यस्मात्कारणा-च्छाब्दबोधस्य प्रक्रियाऽत्रालङ्कारपरिज्ञानं सम्भावय-तीति समुचितम्। अलङ्कारेषु भिन्नभिन्नेषु सत्सु शाब्दबोधस्यापि तेषु पृथक् पृथक् रूपेणोपलब्धिर्भवति। तथा हि उत्प्रेक्षायां शब्दानां क्रिया सविशेषा दृश्यते। धर्म्युत्प्रेक्षायां साधारणधर्मतत्समानाधिकरणयोर्विषय-निष्ठता शब्दविशेषैरेव क्रियान्विता भवति। क्रियोत्प्रेक्षा-यामपि शब्दनक्रिया तत्समानाधिरणयोरभेदेन सम्भावनं शब्दविशेषैरेवान्वीयते। एवमुभयोरध्वसानात् विषयी-भूतस्यालङ्कारस्य प्रतीयमानता जायते। केषाञ्चन मते तु, उत्प्रेक्षाद्यलङ्कारेषु बिम्बप्रतिबिम्बभावस्योपादेयता भवति5। बिम्बप्रतिबिम्बभावेऽप्यभिमते शब्दनक्रिययैव श्रव्यवस्तुनः प्रतिबिम्बात्मकता सहृदयचेतसि उन्मिषन्ती सती प्रकर्षमाप्नोति। एवं शब्दविशेषैरलङ्कारपरिज्ञाने प्रथमं शाब्दबोधः एव तत्रापेक्ष्यते। यत्र च विषय-विषयिणोः सम्बन्धभावस्तत्रापि अभेदसम्बन्धेनोत्प्रेक्षणक्रियायाः शब्दजन्यत्वाच्छब्दतत्त्वस्यैव महत्ता सम्पन्ना।

एवमेवोपमादिसादृश्यमूलकेष्वलङ्कारेषु6 सादृश्य-प्रयोजकानां काव्ये शब्दानुमितिविषयत्वात् **अरविन्द-सुन्दरम्** इत्यादिपदप्रयोगे शाब्दज्ञानेनैव सादृश्यमूला अभेदानुमितिः क्रियते। **एवमेतत्** इत्याकारकबोधस्यात्र शब्दोपपत्तेः विशेषणविशेष्यभावबोधोऽपि संगच्छते। तस्माच्छब्दतावक्रियान्वितिरत्रापि स्फुटैवास्ति काव्य-वस्तुनः स्वरूपनिरूपणे। रूपकाल-ङ्कारेऽपि7 **मुखं चन्द्रः** इत्यादिपदप्रयोगे तात्पर्यत्वेन फलीभूतायां ज्ञानविषयतायामुपमानोपमेययोः अभेदान्वितिर्भवति। **असावय**मित्याकारकज्ञानमूले त्वत्र पदसम्बन्धगता योग्यता बाधनिश्चयेन पराहता भवति। बाधनिश्चयं च शब्दजन्यमेव। नोचेत् लक्षणावृत्त्यैवात्र तात्पर्योपपत्ति-र्भविष्यतीत्यापत्तिः। एवं चेदुपमानोपमेययोः भेदज्ञाने-नैवाभेदान्वितेरपि बाधः स्यात् इत्यभिमते तु रूपकालङ्कारस्याप्युपमाविषयत्वं स्यात्। वस्तुतस्तु शब्दतत्वस्येयं महती भूमिका, ययात्र पूर्वोक्तदोषद्वय-परिहारो भवति। समासोक्ति-वक्रोक्ति-सहोक्ति प्रभृतिष्वप्यलङ्कारेषु यद्यपि वाक्यार्थसम्बन्धिनो प्रकृतार्थस्य प्रकृतभिन्नशब्दैः उपादानत्वं न भवति। तथापि पदार्थरूपकस्य पदनिष्ठत्वं यथासाहित्यिकैर-भिमतं, तथैव समासोक्त्यादिष्वप्युक्तेर्मुख्यत्वाद्वाक्य-निष्ठता। वाक्यस्य पुनः पदमूलत्वात्, पदस्य शब्दरूपत्वाच्च शब्दोपस्कारेणैव **निशामुखं चुम्बति चन्द्र एष**

5 सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।
काव्यप्रकाशः, १०/१३६

6 साधर्म्यमुपमा भेदे। काव्यप्रकाशः, १०/१२४

7 तद्रूपकमभेदो यः उपमनोपमेययोः। काव्यप्रकाशः, १०/१३८

इत्यादिस्थले अभेदान्वयोपपत्तिर्भवति। नो चेत् अप्रकृतार्थमात्रे शब्दान्वितेः सम्भवात् काव्यात्मभूतर-सोद्बोधे बाधा स्यात्। एवमन्येष्वलङ्कारेष्वपि बोध्यमित्य-लमतिप्रसङ्गेन। अथध्वनिविषयकशाब्दबोधो निरूप्यते। स्वरूपदृष्ट्या ध्वनिर्द्विधा शब्दशक्तिमूलः अर्थशक्ति-मूलश्च। शब्दशक्तिमूले तु शब्दतावस्य प्राधान्यं सर्वैरेव स्वीकृतं किन्त्वर्थशक्तिमूले न। अस्माकं मते पुनरुभयत्र शब्दस्यैव प्राधान्यं स्वीकर्त्तव्यम्। उभयत्र स्थले अप्रकृतार्थे सहृदयबुद्धेरसाधारण्यात्। साधारण्येन पुनः प्रकृतार्थानुमितौ अभिधादिशक्तिमाध्यमेन शक्यार्थस्यैव प्राकरणिकेऽर्थे परिणतत्वात् तात्पर्यनिर्णये शाब्दज्ञान-मूलकतैव विषयीभूता दृश्यते। नानार्थशक्तिस्थले तु पुनः तात्पर्यनिर्णायकहेतूनां काव्यप्रयुक्तशब्दमाध्यमेनैवानु-भूतिर्भवति। अतः तद्गतव्यञ्जनाबोधो विद्वद्भिः शाब्द इत्यभिहितः। एकार्थमात्रविषयत्वे तु कुत्रचिदन्वयबोधार्थं पदार्थज्ञानाधारितं प्रकरणादिज्ञानं तात्पर्यं निर्णाययति। एवं तत्रापि शब्दस्यैव महत्ता लक्ष्यते। अपि च अप्राकरणिकार्थबोधे बाधनिश्चयेनापि तद्वत्ताज्ञानस्याभावे व्यञ्जकत्वपक्षस्यैव काव्यानन्दे आपेक्षिकदृष्ट्या लोकोत्तरत्वं दृश्यते। व्यञ्जकत्वपक्षस्य शब्दगतत्वाच्च आर्थ्यामपि व्यञ्जनायाम्, अर्थशक्ति-मूलध्वनौ वा तात्पर्यनिर्णयः शाब्द एव। एवं च ध्वनिगतः शाब्दव्यवहारोऽपि शब्दतावस्यैव ध्वनिक्षेत्रे सर्वत्र माहात्म्यं सूचयति।

अथ गुण-वृत्ति-रीतिगतं शाब्दबोधं विषयीकृत्यो-च्यते। काव्यगुणानां शब्दपक्षता पूर्वं प्रतिपादिता। गुणाभिव्यञ्जकत्वं तत्क्षेत्रे शाब्दबोधप्रक्रियाजन्यं भवतीत्यनेन शब्दतत्त्वस्य तद्गतोपादेयता अत्रास्माकं लक्ष्यभूता। द्रुत्यादिचिद्वृत्तयः कविं तादृशबन्धयोजनायै प्रेरयति, यादृश्यां स शब्दविशेषैः समुचितां सङ्घटनां नियोजयति। सङ्घटनायाः शब्दरूपत्वात्, काव्यबन्धस्य तदुपेतत्वाच्च काव्ये गुणोत्कर्षोऽपि शब्दजन्य इति स्पष्टम्8। गुणानां रसधर्मतायां स्वीकृतायां तु रसोत्कर्षस्य गुणजन्यताऽप्यभिमता। एवं शब्द-गुण-रसानां परम्परया सम्बन्धत्वेन आह्लादस्योत्पत्तिर्मन्तव्या। तस्यां चोपपत्तौ मूलतः शब्दतत्त्वस्यैवोत्कर्षः क्रमेण गुणरूपतामाधास्यन् चरमावस्थायां रसरूपतां गृह्णाति। क्रियान्वयनेऽप्यस्मिन् क्वचिदुत्तरोत्तरमतिशयितत्वाद्रसविशेषोपपत्तिरतिशयेन, क्वचिच्च न्यूनाधिक्यभावेन मम्मटप्रभृतिभिः स्वीकृता। कैश्चित्तु रसानां गुणाश्रयता प्रतिपादिता। तेषां मते गुणविशिष्टा सङ्घटना रसादीनाम् आश्रयभावेन काव्ये तिष्ठन्ती सती काव्यस्वरूपमादत्ते। एवमाश्रयमूले तत्रापि शब्दमहत्ता स्वीकृता।

पण्डितराजप्रभृतीनां मते तु गुणानां रसोपपत्तौ कारणत्वमुक्तम्9। कारणत्वेऽप्यभिमते कार्यस्य रसरूपेणोपलब्धेः कारणस्य तदुपादानभूतेषु काव्य-प्रयुक्तशब्देषु सत्ता स्वीकार्या। नोचेत् **आकारोऽस्य शूरः** इत्यादिलौकिकव्यवहारवत् तन्मतेऽपि मधुरा रचना, **ओजस्वी बन्धः** इत्यादिव्यवहाराणामनुपपत्तिः स्यात्। वृत्तिरीत्योस्तु गुणात्मके काव्यबन्धे स्वरूपाधायकत्वं साहित्यिकैरभिमतम्। तस्मादुभयोरप्यनयोः शब्दाश्रयता स्पष्टीभवति। उभयोः स्थलेऽपि गुणव्यञ्जकैः काव्यशब्दै-रेव जायमानेन बोधेन निर्णायकत्वमिति शब्दस्यैवोभय-संवाहकत्वात् काव्ये धाराप्रवाहिकगतिशीलतया नैरन्तर्येण श्लोकपाठे तादृशचमत्कारानुभूतिः सर्वत्र दृश्यते।

8 ये रसस्याङ्गिनो धर्माः शौर्यादयः इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः।। काव्यप्रकाशः, ८/६६

9. गुणानां चैषां द्रुति-दीप्ति-विकासाख्यास्तिस्रश्चित्तवृत्तयः क्रमेण प्रयोज्याः तत्तद्गुणविशिष्टरसचर्वणाजन्या इति यावत्। रसगङ्गाधरः, प्रथमाननम्, चौखम्बा विद्याभवन, वाराणसी। पृ. 223

एवं गुणवृत्तिरीतिषु शाब्दबोधः सुसम्मतः। अभिधावृत्तिष्वपि शाब्दबोधक्रियान्वितिः स्पष्टीक्रियते। प्रथममभिधाशक्तौ जात्याद्युपहितत्वात् शब्दतत्वजन्यबोधस्यैव शक्तिः कारणत्वाच्च शाब्दबोधो विषयीभूतः इति वक्तुं शक्यते। यद्यप्यभिधायाः क्षेत्रे प्रतिपादकत्वपक्षं निराकर्तुं पण्डितराजेन प्रतिपत्त्यनुकूलव्यापारस्य शाब्दबोधे कारणत्वमुक्तम्। कारणत्वे चात्माश्रयदोषवारणाय शाब्दबोधस्याभिधाव्यतिरिक्तशक्त्या सम्भावनमुक्तम्। किन्त्वस्माकं मते तु तत्स्थले अभिधाव्यतिरिक्तशक्तेरसम्भवात् तन्मतस्यानौचित्यम्। अपि च, आत्माश्रयदोषस्तु **शक्त्या प्रतिपादकत्वम्** इत्यादिलक्षणे शक्तेर्गौणप्रयोगाल्लक्ष्यते। तस्मात् **जात्याद्युपाधिप्रतिपादकत्व**-मिति परिवर्तने कृते स्वत एव दोषपरिहारः स्यात्।

लक्षणायान्तु मुख्यार्थलक्ष्यार्थयोः सम्बन्धः शब्दतत्वावगमेनैव सम्भवः। सम्बन्धेऽत्रान्वयबाधस्य लक्षणाबोधे कारणत्वं सर्वैरेव काव्यशास्त्राचार्यैरभिहितम्। अन्वयबाधस्य चान्वयानुपपत्तेः अनपेक्षत्वाल्लक्ष्यार्थस्यैव लक्षणबोधे न तात्पर्यानुमितिजनकत्वमिति वाच्यम्। तथा हि, लक्ष्यार्थोपपत्तिपौर्विककालक्षणेष्वन्वयस्य शाब्दी अनुभूतिर्भवति। सा पुनः शाब्दबोधमपेक्ष्य तात्पर्योपपत्तौ हेतुभूतस्य लक्ष्यार्थस्याधारत्वेन तत्र शब्दतत्त्वस्य सहकारित्वेन तिष्ठति। अस्मादेव कारणाद् **गङ्गायां घोषः** इत्यादिस्थले समीप्यार्थरुपतात्पर्यस्योपपत्तौ **गङ्गाया**-मित्यस्मिन् पदे अन्वयबाधपूर्वकोपस्थापिततटपदस्याकाङ्क्षा जायते। **तट** इत्यस्य शब्दस्यापेक्षा शाब्दबोधक्रियान्वयनेनैव सम्भवति। निरुढालक्षणायान्तु पदेष्वेव शक्तिरियं निश्चीयते। तस्माद् **धर्मस्यायमनुकूलं** इत्यादिवाक्येषु शाब्दबोधेनैव लक्षणागतता-त्पर्योपपत्तिः सुस्पष्टा। प्रयोजनवत्यान्तु प्रयोजनस्य गूढत्वादपि शाब्दबोधेन तदनुभूतिर्भवति। तथा हि **एतानि तिलानि हेमन्ते सुखानि** इत्यादिस्थलेषु तिलानां हेमन्ते प्रयोगप्रयोजनमूलकम्। प्रयोजनं चात्र, शरीरे उष्णत्वाद्यनुभूतिरिति। तच्च **'सुखानि'** इत्यनेन पदेन हेमन्तानुकूलत्वेऽर्थे लक्ष्यते। एवमित्याकारकोऽयं ज्ञानः शाब्दबोधानुगत उदाहार्यः। काव्ये व्यञ्जनाबोधः शाब्दबोध एवाधारितः इति नात्र विप्रतिपत्तिः। प्रथमं मम्मट्टदीनां मते काव्यप्रयुक्तशाब्दज्ञानाधारितेन पदज्ञानेन नानार्थप्रतिपत्तिः सम्भाव्यते। पुनश्च समेषामर्थानां शाब्दबोधे भानरूपत्वात् तात्पर्यनिर्णयः सङ्गच्छते। एवं हि **गतोऽस्तमर्कः** इत्यादिस्थले अप्राकरणिकार्थपरिहारो भवति। प्राकरणिकार्थोपस्थितेस्त्वन्वयबोधे न काप्यापत्तिः। अन्वयबोधश्चायं व्यञ्जनाव्यापारगम्य इत्यपि पौर्वकालिकशाब्दबोधप्रक्रियैव तत्स्थले स्पष्टीभवति। आनन्दवर्धनमते तु केवलं प्राकरणिकार्थस्यैव शाब्दबोधानुगतत्वमभिमतम्। व्यञ्जनया त्वन्यार्थबोध इति। किन्त्वस्माकं मते अन्ये अर्थास्तु तात्पर्यनिर्णयावस्थातः पूर्वभूता भवन्ति। पश्चात्तु तात्पर्यनिर्णयेऽन्यार्थबोधोऽपि न तात्पर्यव्यतिरिक्तो मन्तव्यः। एवं व्यञ्जनयैव वृत्त्या पूर्वं नानार्थप्रतिपत्तिः, पश्चाच्च तात्पर्योपपत्तिरुभयत्र शाब्दबोधं विषयी करोति। शाब्दबोधस्यैव काव्ये सर्वत्र सापेक्षत्वमिति ज्ञायते।

प्रतिहते वर्णेषु वाचकेषु स्थितेषु अर्थबोधः कथमिति विचार्यते। तत्रापि-

**श्रुतिस्मृतिपुराणानां पदानामन्वये सति।**
**योऽर्थो विज्ञायते तस्मै विष्णवे ब्रह्मणे नमः॥**

एवं प्रकारेण अर्थबोधः कथमिति प्रश्ने प्राप्ते अभिहितान्वयवादिनः समादधति। तदित्थं- पदैरेव स्वाभिहितपदार्थेभ्यो द्वारभूतेभ्यः सन्निधानादिसहकारिवशात् पदार्थानामन्योन्यान्वयप्रतिपत्तिर्लक्षणया

सिद्ध्यति। पदार्थानामन्योन्यान्वयप्रतिपत्तिश्च वाक्यार्थ-बोध अर्थबोध वा इत्युच्यते। अत्राभिहितान्वयवादे अन्वयव्यतिरेको प्रमाणम्। तथाहि-पार्थस्मृतिसत्वे वाक्यार्थप्रत्ययः, पदार्थस्मृत्यभावे वाक्यार्थप्रत्ययाभाव इत्यन्वयव्यतिरेकौ। अन्यथा10 पदार्थस्मृतिवाक्यार्थ-प्रत्ययोरन्वयव्यतिरेकाभावे पदनिवहश्रवणसमनन्तरं कस्माच्चिन्मानसापराधादनुपजनितपदार्थस्मृतेः पुरुष-स्यापि वाक्यार्थबोधोदयः, श्रुतपदनिवहस्य मानान्त-रादुपजनित पदार्थस्मृतेः पुरुषस्य वाक्यार्थबोधानुदयश्च स्याताम्। एवं चान्वयव्यतिरेकवद्भिरभिधेयस्मरणैः स्मृतैर्वाभिधेयैरन्वयो बोध्यत इति सुगमम्। अत्रैकः पूर्वपक्ष उदेति- सत्यम्, उपर्युक्तं सुगमं भवेद् यदि पदार्थस्वरूपमात्रे पदसामर्थ्यं स्यात्। न तु तदस्ति, इतरान्वित एव पदार्थे पदसामर्थ्यं लोके दृष्टमिति। समाधीयत अत्र- प्रयोगप्रत्ययाभ्यां हि पूर्वं पदसामर्थ्य-मवधार्यते प्रयोगप्रत्ययाभ्यां च पदार्थस्वरूपमात्रे पदसामर्थ्यं ज्ञायते, न त्वितरान्विते। तथा हि-गामानय, गां नय, अश्वमानय, अश्वं नय इत्यादिप्रयोगेषु गोपदस्यावापे गोस्वरूपमात्रस्यावापस्तथा गोपदस्योद्वापे तत्स्वरूप-मात्रस्योद्वापो दृश्येते न तु क्रियान्विततत्त्वस्वरूप-स्यावापोद्वापौ। तेनेदं ज्ञायते गोस्वरूपमात्रे गोपद-सामर्थ्यमिति। एवं घटपदश्रवणसमनन्तरं घटपदार्थ एव प्रतिपद्यते, आनयेति पदश्रवणान्नतरं तदर्थ एव प्रतिपद्यते तेनापि पदार्थस्वरूपमात्रे पदसामार्थ्यमवगम्यते। अन्यथा योग्येतरान्वित एव पदार्थः पदश्रवणानन्तरं प्रतिपद्यते चेत् पूर्वं गुरुभिरुक्तं घटमानय, गां नयेति।

एवमिहान्तिमाध्याये शब्दार्थयोः काव्यशास्त्रीयं वैशिष्ट्यं स्वरूपं शाब्दबोधश्चेति मुख्यरूपेण प्रतिपादितम्।

**शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानं, मानितविश्वविद्यालयः**
**जयपुर-परिसरः, जयपुरम्**

10. तदुक्तं शाबरभाष्ये-अन्वयव्यतिरेकाभ्यामेतदवगम्यते, मान-सादापचारादुच्चारितेभ्योऽपि पदेभ्यो यदि पदार्था नावसीयन्ते न तदा वाक्यार्थो गम्यते। अन्तरेणापि पदोच्चारणं यः शौक्ल्यमव-गच्छति अवगच्छत्येवासौ शुक्लगुणकं द्रव्यमिति। (१/१/५)

## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/-, पंचवर्षीय शुल्क 500/-, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारती**

खाता संख्या - **2139101912502**

**IFS Code - CNRB0002139**

नारी-स्तम्भः

# विश्वमित्र-देवकी अम्मा

❑ डॉ. राजेश्वरीभट्ट

अर्द्धशतीपूर्वं पर्यावरणप्रदूषण-वैश्विकताप-मानस्य सततवृद्धिसदृशीभिरद्योत्थिताभिः समस्याभिः सर्वथा अनभिज्ञा, सहजेनैव वृक्षाणां नैसर्गिकसुषमाप्राणशक्तिमहदुपयोगितादिभि-र्दिव्यगुणैः समाकृष्टा 'केरलप्रदेश' निवासिनी श्रीमती 'कोल्लाकयिल देवकी अम्मा' नवनवीनानां वृक्षाणां रोपणं संरक्षणञ्च स्वजीवनस्य प्रथमं संकल्पममन्यत। ततो वृक्षारोपणं देवक्या नित्यकर्मसु समन्वितं जातम्। साधिकाया देवक्या जीवने कोऽपि दिवस ईदृशो न भवति यदा सा नववृक्षस्य क्षुपस्य वा संरोपणे संलग्ना न दृश्यते। पावनस्यास्य कर्मणः कृते 'देवकी अम्मा' न तु कामप्यौचारिकीं शिक्षां गृहीतवती न वा कस्मिन्नपि पर्यावरणप्रशिक्षणशिविरे प्रशिक्षणं प्राप्तवती। केवलं दृढसंकल्पेन जीवनसहचरस्य पूर्णसहयोगेन च देवकी आत्मनः संकल्पं प्रति अग्रेसरा जाता। प्राथमिकशिक्षाप्राप्ताया देवक्याः पतिः गोपाल-कृष्ण पिल्लई एकस्मिन् विद्यालये अध्यापनकार्ये नियुक्त आसीत्। यदा यदाऽपि 'गोपालकृष्णन' कार्यवशाद् नगराद्बहिरगच्छत् तदा तदैव पत्नीं प्रसादयितुं तस्यां संकल्पं साधयितुं मनोबलञ्च समेधयितुं वृक्षकद्वितीयेन सहैव गृहं प्राविशत्। शनैः शनैः देवकी महत्परिश्रमेण गोपालकृष्णस्य सहयोगेन च 5 एकड़ भूमौ दुर्लभजातीनां विभिन्नानां वृक्षाणां संरोपणे संरक्षणे च समर्थाऽभवत्। पूर्वं भूमिरियं पिल्लईपरिवारस्य सुयंक्तसम्पदासीत् किन्तु गोपालकृष्णन् महाभागस्य निधनानन्तरं परिजनानां सहमत्या देवकी विशालेऽस्मिन् परिसरे स्वेच्छया वृक्षाणां संरोपणं सज्जाकार्यं च कृतवती। देवक्या उपवने कृष्णनाल-कयाम्बू सदृशा दुष्प्राप्या दिव्याश्च वृक्षा अपि दृश्यन्ते। कृष्णनालवृक्षस्य विषये प्रसिद्धर्वर्तते यद् अस्य वृक्षस्य पर्णेषु भगवान् कृष्णः, नवनीतं निधाय अखादत्। ज्ञायते यत् कवयः कस्यापि वृक्षस्य श्यामवर्णं भगवतः कृष्णस्य शरीरस्य श्यामवर्णेन सह तुलयन्ति। एतदतिरिक्तं देवक्या उपवने नागरंग-जम्बू आम्रादयो वृक्षाः शोभन्ते। उपवने विलसन्तः कदली-वेतस्-तमाल-खर्जूर-नारिकेलादयो वृक्षा वातेरितैः, पल्लवैः आगन्तुकानां आह्वानं कुर्वन्त इव प्रतीयन्ते। विभिन्न-जातीनां वृक्षाणां संग्रहेण उपवनमिदं वनस्पतिशास्त्र-विशेषज्ञानां कृते एवमेव शोधार्थिनां कृते प्रशिक्षण-स्थलमिदम् उपयोगि वर्तते। विशालपरिसरे अगणित-वृक्ष-लता-गुल्मादिभिरावृतं, हरित-मनोहरञ्च देवक्या उपवनं पर्यटकानां मनांस्या-वर्जयति। आत्मनः प्रशंसनीयस्य दुष्करस्य कार्यस्य कृते दक्षिणभारते 'देवकी अम्मा' 'ग्रीनग्रेन्डमाँ' नाम्नाऽपि ज्ञायते। देवक्या साधनासिद्धं जीवनवृत्त-माधारीकृत्य दक्षिणभारते ''मदर ट्री'' नाम्नी एका 'डाक्यूमेन्टरी फिल्म' निर्मिता जाता। परमहर्षस्य विषयोऽयं वर्तते यत् 2002 तमे वर्षे भारतसर्वकारेण 'देवकीअम्मा' 'इन्दिरागान्धि विश्वमित्र' पुरस्कारेण पुरस्कृता जाता। सम्प्रति वयसः पञ्चाशीतिवर्षाण्य-तीतानि तथापि योगिनी देवकी अम्मा वृक्षाराधन-साधनायां संलग्ना दृश्यते। नूनं वृक्षाराधिका देवकीअम्मा अस्माभिः प्रशंसनीयाऽनुकरणीया च वर्तते। पर्यावरणंरक्षायै वृक्षाणां संरोपणं संरक्षणञ्च मानवानां परमो धर्मो वर्तते कथितञ्च-

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम्।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः।।

भा.पु. स्कन्ध 10, अ. 22 श्लो. 33

**गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते।**
**भा.पु. स्कन्ध 10, अ. 22 श्लो. 34**
**पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।**
**धन्या महीरूहा येभ्यो निराशा यान्ति नार्थिनः।।**
**भा.पु. स्कन्ध 10, अ. 22 श्लो. 33**

## हिन्दी अनुवाद

अर्द्धशताब्दीपूर्व पर्यावरणप्रदूषण तथा निरन्तर बढ़ते हुए वैश्विक तापमान जैसी वर्तमान समस्याओं से अनभिज्ञ केरलप्रदेश निवासिनी कोल्लाकयिल देवकी आम्मा ने वृक्षों की नैसर्गिक सुषमा, सञ्जीवनीशक्ति एवं महती उपयोगिता से आकर्षित होकर नये-नये वृक्ष लगाना एवं उनका संरक्षण करना अपना प्रथम लक्ष्य बना लिया। अब वृक्ष लगाना देवकी अम्मा के नित्यकर्म में शामिल हो गया साधिका देवकी के जीवन में ऐसा कोई दिन नहीं व्यतीत होता है जब वह नवीन वृक्ष के लगाने में संलग्न नहीं होती। इस पवित्र कर्म के लिए देवकी अम्मा ने न तो कोई औपचारिकी शिक्षा ग्रहण की है न ही पर्यावरण का प्रशिक्षण प्राप्त किया है। केवल दृढ़ संकल्प एवं अपने जीवनसहचर के पूर्ण सहयोग से देवकी अम्मा अपने लक्ष्य की ओर अग्रेसर है। प्राथमिक शिक्षा प्राप्त देवकीअम्मा के पति गोपालकृष्णन् पिल्लई किसी विद्यालय में अध्यापक थे। गोपालकृष्णन् जब-जब भी किसी कार्यवश नगर से बाहर जाते थे तो अपनी पत्नी की प्रसन्नता के लिए उसके संकल्प की सिद्धि के लिये तथा मनोबल की वृद्धि के लिए एक वृक्ष लेकर ही घर में प्रवेश करते धीरे-धीरे देवकी के परिश्रम एवं गोपाल-कृष्णन् के सहयोग से देवकी 5 एकड़ भूमि पर दुर्लभ जाति के विभिन्न वृक्ष लगाने में तथा उनको सुरक्षित रखने में समर्थ हो सकी। पूर्व में यह भूमि पिल्लई परिवार की संयुक्त सम्पदा थी। किन्तु सहसा देवकी अम्मा के पति गोपालकृष्णन् के निधन के पश्चात् अपने परिजनों की सहमति से देवकीअम्मा अपने विशाल परिसर में स्वेच्छा से वृक्षारोपण एवं उनकी देखभाल करने में सक्षम हुई। देवकीअम्मा के उपवन में कृष्णनाल, कयाम्बू जैसे दुष्प्राप्य एवं दुर्लभ वृक्षों पाये जाते हैं। कृष्णनालवृक्ष के विषय में यह प्रसिद्धि है कि इस वृक्ष के पत्रों पर नवनीत रख कर श्री कृष्ण खाया करते थे। कवियों के अनुसार कयाम्बू वृक्ष का श्याम वर्ण कृष्ण के श्याम शरीर के समान है। इसके अतिरिक्त देवकी अम्मा के उपवन में नारंगी-जामुन-आम-आदि वृक्ष सुशोभित हैं। विशाल उपवन में लहलहाते हुए बेत-तमाल-खजूर नारियल आदि वृक्ष अपने वायु से हिलते हुए पत्तों के द्वारा आगन्तुकों का आह्वान करते हुए प्रतीत होते है। विभिन्न जाति के वृक्षों के संग्रह के कारण देवकी अम्मा का उपवन वनस्पतिशास्त्र विशेषज्ञों एवं सम्बन्धित शोधार्थियों के लिए प्रशिक्षणकेन्द्र की भाँति उपयोगी है। विशाल भूमि भाग में अगणित वृक्ष-लता एवं गुल्मों से आच्छादित देवकीअम्मा का उपवन अपनी हरियाली एवं रमणीयता के कारण पर्यटकों के मन को आकर्षित करता है। अपने प्रशंसनीय एवं दुष्कर कार्य के लिए देवकी दक्षिण भारत में 'ग्रीन ग्रेन्डमाँ' नाम से भी प्रसिद्ध है। देवकीअम्मा के साधाना सिद्ध जीवनवृत्त के आधार पर दक्षिण भारत में 'मदर ट्री' नामकी एक ड्राक्यूमेन्ट्री फिल्म भी बनाई गई। अत्यन्त हर्ष का विषय है कि 2002 ई में भारत सरकार द्वारा देवकी अम्मा 'इन्दिरागांधी विश्वमित्र पुरस्कार' से पुरस्कृत हुई है। अपनी उम्र के 85 पिच्वासी वर्ष पूर्ण करने के बाद आज भी देवकीअम्मा वृक्ष आराधना में संलग्न दिखाई देती है। देवकीअम्मा निश्चय ही हमारे द्वारा अनुकरणीय एवं प्रशंसनीय महिला है। पर्यावरण की रक्षा के लिए वृक्ष लगाना एवं उनका संरक्षण करना मानव का परम धर्म है। कहा भी गया है- **पत्ते-फूल-फल-छाया-जड़-वल्कल और लकड़ी देकर दूसरों का उपकार करने वाले वृक्ष धन्य हैं जहाँ से याचक निराश नहीं हाते हैं ।**

**भागवत पुराण, 10 स्कंध अ. 22/33-34 श्लोक**

-सी-276, भाभामार्ग, तिलकनगर, जयपुर

## आयुर्वेद-स्तम्भः

# हरिद्रा वरवर्णिनी

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः





**भारतवर्षे परम्परातः बहुविधानां स्वास्थ्य-संरक्षकाणां रोगापहारकाणाञ्च द्रव्याणां प्रयोगः आहारमाध्यमेन भवति। भारतीयानां महानसः स्वल्पौषधालयो भवतीति कथयन्ति तज्ज्ञाः। बहुविधेषु व्यञ्जनेष्वाहारप्रकल्पेषु औषधगुणधारिणां द्रव्याणां प्रयोगः पाकप्रक्रियायां भवति। शाकनामकस्य व्यञ्जनस्य निर्माणक्रमे तु जीरक-हिंगु-हरिद्रा-धान्यक-रक्तमरिच-राजिकामेथिका-सामुद्रलवणे-त्यादीनां गुणप्रदानां स्वादिष्टकारकाणां द्रव्याणां सामान्यरूपेण प्रतिदिनमेव प्रयोगो भवति। कदाचित् विशिष्टव्यञ्जननिर्माणक्रमे तु शुण्ठी-मरिच-पिप्पली-कृष्णजीरक-लवंग-त्वक्-जातीपत्री-जातीफल-सूक्ष्मैला-स्थूलैला-सौवर्चल-सैन्धवेत्यादीनां तीक्ष्णवीर्याणामाशुकर्मकराणां विशिष्टानामौषध-स्वरूपाणामल्पमात्रायां प्रयुज्यमानानां द्रव्याणामपि प्रयोगो भवति। एतादृग्विधानां द्रव्याणां प्रयोगस्तु प्रतिदिनं नैव भवति।**

भारतवर्ष में परम्परागतरूप से अनेक प्रकार के स्वास्थ्य संरक्षक तथा रोगों को दूर करने वाले द्रव्यों का प्रयोग आहार के माध्यम से होता है। विशेषज्ञ कहते हैं कि भारतीयों का रसोई घर एक छोटा औषधालय होता है। अनेक प्रकार के व्यञ्जनों में और आहार के प्रकल्पों (प्रकारों निर्मित आहार कल्पनाओं) में औषधीय गुणों को धारण करने वाले द्रव्यों का प्रयोग पाक-प्रक्रिया में होता है। शाक नाम के व्यञ्जन के निर्माण के क्रम में तो जीरा, हींग, हल्दी, धनिया, लाल मिर्च, राई, मेथी एवं नमक इत्यादि गुणप्रद स्वादिष्ट बनाने वाले द्रव्यों का सामान्यरूप से प्रतिदिन ही प्रयोग होता है। कभी-कभी विशिष्ट व्यञ्जन के निर्माण-क्रम में तो सोंठ, मरिच, पिप्पली, काला जीरा, लोंग, दालचीनी, जावित्री, जायफल, छोटी इलायची, बड़ी इलायची, काला नमक, सैन्धव नमक इत्यादि शीघ्र कर्म करने वाले तीक्ष्ण वीर्य वाले विशिष्ट एवं औषधस्वरूप वाले तथा अल्प मात्रा में प्रयुक्त किए जाने वाले द्रव्यों का भी प्रयोग होता है। इस तरह के द्रव्यों का प्रयोग तो प्रतिदिन नहीं होता है।

**यदा-कदा प्रयुज्यमानानां तथा प्रतिदिनं प्रयुज्यमानानामेतेषां द्रव्याणां शरीरोपरि प्रभावः मात्रायां प्रयुक्ते सति सर्वदा सुखकारकः स्वास्थ्यदायकश्च भवति। तीक्ष्णवीर्यात्मकानामुपरि-निर्दिष्टानां शुण्ठ्यादिद्रव्याणां मात्रात्मकोऽपि प्रयोगः प्रतिदिनं नियमितरूपेण न करणीयः। इति तु सर्वे पारम्परिकरूपेण जानन्त्यपि। जीरक-हिंगु-हरिद्रा-दीनाञ्च मात्रात्मकः प्रयोगः प्रतिदिनं करणीयः सुखदश्च भवति। महानसे स्वल्पमात्रायामेव व्यञ्जनादिषु प्रयुज्यमानानां केषाञ्चिद् विशिष्टानां द्रव्याणां प्रयोगः रसायनविधिनापि करणीयः वर्तते, रसायनविधौ प्रयुज्यमानस्य द्रव्यस्य मात्रा त्वधिका भवति। कदाचित् स्वल्पमात्रायामपि विशिष्टेन विधिना प्रयुक्तान्येतानि द्रव्याणि रोगाणां निवारणमपवारणञ्च कुर्वन्ति। विशिष्टेष्वेतेषु रोगापहारकेषु द्रव्येष्वेकं विशिष्टं द्रव्यं हरिद्रानामकं वर्तते।**

यदा-कदा प्रयुक्त किए जाने वाले तथा प्रतिदिन प्रयुक्त किए जाने वाले द्रव्यों का शरीर के ऊपर प्रभाव मात्रा में प्रयुक्त करने पर सर्वदा सुखकारक और स्वास्थ्यप्रद होता है। ऊपर बताए गए तीक्ष्ण वीर्य वाले सोंठ आदि द्रव्यों का मात्रापूर्वक प्रयोग भी प्रतिदिन नियमित रूप से नहीं करना

चाहिए। यह बात तो सभी पारम्परिक रूप से जानते भी हैं। जीरा, हींग और हल्दी आदि का मात्रापूर्वक प्रयोग प्रतिदिन करने योग्य है और सुखदायी भी है। रसोईघर में प्रतिदिन स्वल्पमात्रा में ही व्यञ्जनादि में प्रयुक्त किए जाने वाले कुछ विशिष्ट द्रव्यों का प्रयोग रसायनविधि से भी करने योग्य होता है। रसायनविधि में प्रयुक्त किए जाने वाले द्रव्य की मात्रा तो  अधिक होती है। कभी स्वल्प मात्रा में भी विशिष्ट विधि से प्रयुक्त ये द्रव्य रोगों को दूर करते हैं और रोकते हैं। रोग का हरण करने वाले इन विशिष्ट द्रव्यों में एक हरिद्रा नाम का विशिष्ट द्रव्य भी है।

**गुणधारणरूपेण विशिष्टा ह्येषा हरिद्रा सामान्य-परिचयस्यापेक्षिणी न वर्तते। यतो हि महानसे प्रतिदिनमेवावश्यकरूपेणास्य प्रयोगः शाकाख्ये व्यञ्जने भवत्येव। अत्रास्य सामान्यो विशिष्टश्च परिचयः प्रस्तूयते। संस्कृत-नामोल्लेखक्रमे त्वाचार्यः वाग्भटः कथयति, यत्-**

**हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी।**
**कृमिघ्नी हलदी योषित्प्रिया हट्टविलासिनी।।**
**( भावप्रकाशनिघण्टु )**

**हरिद्रा रसे तु प्रमुखरूपेण कटुका तिक्ता वर्तते, रूक्षोष्णा ह्येषा कफपित्तनुद् भवति। बाह्यप्रयोगेणा-भ्यन्तरप्रयोगेण चैषा वर्ण्या भवति। स्वयमपि च वरवर्णिनी नाम धारयति। विभिन्नानां त्वग्दोषाणां विनाशिनी निशा रक्तदोषाणां निवारणं करोति। कृमिघ्नी तु विशेषेणैषा प्रमेहे सुखदा भवति। प्रमेहमधुमेहयोः सर्वदा पथ्या काञ्चनवर्णी हरिद्रा विशेषेण योषित्-प्रिया भवति।**

गुणों को धारण करने में विशिष्ट यह हरिद्रा सामान्य परिचय की अपेक्षा नहीं रखती है। क्योंकि रसोईघर में प्रतिदिन ही आवश्यकरूप से इसका प्रयोग शाक नाम के व्यञ्जन में होता ही है। यहाँ इसका सामान्य और विशिष्ट परिचय प्रस्तुत किया जा रहा है। संस्कृत के नामों का उल्लेख करने के क्रम में तो आचार्य वाग्भट कहते हैं कि-

हरिद्रा, कांचनी, पीता, निशा के संस्कृत में जितने नाम हैं वे सभी (निशा नाम वाली), वरवर्णिनी, कृमिघ्नी, हलदी, योषित्प्रिया और हट्टविलासिनी ये हरिद्रा के संस्कृत नाम हैं।

हरिद्रा रस में तो प्रमुखरूप से कटुरसवाली (चरपरी) और तिक्त रस वाली (कड़वी) होती है, रूक्ष और ऊष्ण यह हल्दी कफ और पित्त को नष्ट करने वाली होती है। बाह्य और आभ्यन्तर प्रयोग करने से यह वर्ण को निखारने वाली होती है और खुद भी वरवर्णिनी नाम धारण करती है। त्वचा के विभिन्न दोषों (विकृतियों) को नष्ट करने वाली हल्दी रक्त दोषों का निवारण करती है। कृमियों को नष्ट करने वाली यह विशेष रूप से प्रमेह में सुख देने वाली होती है। प्रमेह और मधुमेह में सदा पथ्य यह काञ्चनवर्णी हरिद्रा विशेषरूप से योषित् प्रिया (स्त्रियों को प्रिय लगने वाली होती है)।

**उद्वर्तनादिषु बाह्यरूपेण प्रयुज्यमाना त्वचः वर्णप्रसादनं करोत्यत एव ह्येषा योषित्-प्रिया भवति। भारतवर्षस्य दक्षिणे भू-भागे स्त्रियः प्रतिदिनमेव हरिद्रामिश्रणेन मुखलेपनं कुर्वन्ति। उत्तरे तु भू-भागे विशिष्टेष्ववसरेष्वस्या उद्वर्तनादिरूपेण प्रयोगं कुर्वन्ति स्त्रियः पुरुषाश्च। व्रणेषु प्रयुज्यमाना हरिद्रा पूयशोषणं व्रणरोपणञ्च करोति। शोषे राजयक्ष्मणि च बहूपयोगिनी ह्येषा पीता पाण्डुरोगस्य विनाशनमपि करोति। अर्शःसु बाह्यप्रयोगे तथाऽऽ-भ्यन्तरप्रयोगेऽपि श्रेष्ठा हलदी शोथहराऽपि वर्तते। अस्य कर्माणि तु शास्त्रे दीपन-लेखन-वर्ण्य-शोणितप्रसादन-प्रमेहघ्न-मूत्रसंग्रहण-कुष्ठघ्न-कृमिघ्न-व्रणरोपण-शोथहरेत्या-त्मकान्युल्लिखितानि सन्ति। अस्याः वर्णनप्रसङ्गे आचार्यवाग्भटः कथयति, यत्-**

**हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत्।**
**वर्ण्या त्वग्दोषमेहास्त्रशोथपाण्डुव्रणापहा।।**
**( भावप्रकाशः, हरीतक्यादिवर्गः )**

उबटन आदि में बाह्यरूप से प्रयुक्त की जाने वाली यह त्वचा का वर्णप्रसादन (वर्ण में निखार) करती है इसलिए ही यह योषित्-प्रिया होती है। भारतवर्ष के दक्षिण भू-भाग में स्त्रियाँ प्रतिदिन ही हरिद्रा के मिश्रण से मुखलेपन करती हैं। उत्तरी भू-भाग में तो विशिष्ट अवसरों पर स्त्रियाँ और पुरुष इसका उबटन आदि के रूप में प्रयोग करते हैं। व्रणों में प्रयोग की जाने वाली हरिद्रा पूय का शोषण करती है और व्रण का रोपण (भरना) करती है। शोष में तथा राजयक्ष्मा में अत्यन्त उपयोगी यह पीता (हल्दी) पाण्डुरोग का विनाश भी करती है। अर्श में बाह्य और आभ्यन्तर प्रयोग में श्रेष्ठ हल्दी सूजन को दूर करने वाली भी होती है। शास्त्र में इसके कर्म तो दीपन, लेखन, वर्ण्य शोणितप्रसादन, प्रमेहघ्न, मूत्रसंग्रहण, कुष्ठघ्न, कमिघ्न, व्रणरोपण और शोथहर ये उल्लिखित हैं। इसके वर्णन के प्रसङ्ग में आचार्य बाग्भट करते हैं कि-

हरिद्रा कटुरसवाली तिक्तरसवाली, रूक्ष ऊष्ण होती है तथा कफ और पित्त को नष्ट करने वाली होती है। वर्ण को निखारने वाली त्वचा के दोष, प्रमेह, रक्तविकृति, शोथ, पाण्डु और व्रण को दूर करने वाली होती है।

**पर्वतस्यासन्नस्थलेषूपत्यकाख्येषु कृषिमाध्यमे-नोत्पाद्यमाना हरिद्रा भारतवर्षे विशेषेणोपयुज्यते। प्रतिदिनं महानसे शाकादिषु प्रयुज्यमाना निशा जनानां स्वास्थ्यसंरक्षिका वर्तते। क्षुपरूपेण समुत्पन्नाया: निशाख्याया: कन्दानामेव प्रयोगो भवति। आर्द्रां हरिद्रां शाकरूपेण प्रयुञ्जन्ति जना:। श्वास-कास-प्रमेह-शीतपित्तादिष्वस्या: स्वरस: परमोपयोगी भवति। यद्यपि पूर्वस्मिन् लेखे हरिद्राया: प्रयोगाणामुल्लेख: कृत एव, पुनरप्यत्र केषाञ्चि-दन्येषां प्रयोगाणामप्युल्लेख: क्रियते-**

**- आमलकीस्वरसं 20 मि.लि. तथाऽऽर्द्राया: हरिद्राया: स्वरसं 10 मि.लि. मात्रायां गृहीत्वा पानं करणीयमनेन पानेन प्रमेहस्य शीतपित्तस्य रक्तविकृते-श्चापाकरणं भवति।**

**- गोमूत्रेण सह हरिद्राचूर्णप्रयोग: ग्रामद्वयस्य मात्रायां कुष्ठापहो भवति। गोमूत्रेणैव च बाह्य-प्रयोगेणाभ्यन्तरप्रयोगेण चैतत् कण्डूघ्नमपि भवति।**

पर्वत के पास की भूमि उपत्यकाओं में खेती के द्वारा उगायी जाने वाली हल्दी भारतवर्ष में विशेष रूप से काम में ली जाती है। प्रतिदिन रसोईघर में प्रयुक्त होने वाली हल्दी लोगों के स्वास्थ्य का रक्षण करने वाली होती है। क्षुप के रूप में उत्पन्न हल्दी के कन्दों (जड़ में होने वाली गाँठों) का ही प्रयोग होता है। लोग ताजा गीली हल्दी को शाक के रूप में प्रयुक्त करते हैं। श्वास, कास, प्रमेह और शीतपित्तादि रोगों में इसका स्वरस अत्यन्त उपयोगी होता है। यद्यपि इससे पहले वाले लेख में हरिद्रा के प्रयोगों का उल्लेख कर ही दिया गया है, फिर भी यहाँ पर कुछ अन्य प्रयोगों का भी उल्लेख किया जा रहा है-

- आँवले का रस 20 मि.लि. तथा ताजा गीली हल्दी का स्वरस 10 मि.लि. की मात्रा में ले कर पीना चाहिए। इसका पान करने से प्रमेह का शीतपित्त का और रक्तविकृति का दूरीकरण (विनाश) होता है।

- गोमूत्र के साथ हरिद्रा के चूर्ण का प्रयोग दो ग्राम की मात्रा में करने पर यह कुष्ठ को दूर करने वाला होता है और गोमूत्र से ही बाह्य प्रयोग से और आभ्यन्तर प्रयोग से यह चूर्ण कण्डूघ्न (खुजली को नष्ट करने वाला) भी होता है।

**हरिद्रादि गणप्रयोग:-**

**हरिद्रा-दारुहरिद्रा-पृश्निपर्णी-इन्द्रयव-मधुयष्टी - स्वरूपक: हरिद्रादिगण: श्रेष्ठ: स्तन्यशोधको वर्तते। आचार्य: सुश्रुत: निर्दिशति यत् हरिद्रादिगण: विशेषरूपेण दोषपाचक: वर्तते स्तन्यस्य च शोधनं करोति, आमातिसारशमन: ह्येष: गण: आमसंसृष्टानां दोषाणां पाचनं करोतीति व्याख्याकार: डल्हण: स्पष्टयति।**

**हरिद्रादितैलम्-**

**भैषज्यरत्नावल्यां शिरसि पुन: पुन: समुत्पन्नाना-मरूंषिकाणां विनाशनार्थं तैलमेकं निगदितम्-**

हरिद्राद्वयभूनिम्बत्रिफलाऽरिष्टचन्दनैः।
एतत्तैलमरूंषीणां सिद्धमभ्यञ्जते हितम्।।
(भैषज्यरत्नावली क्षुद्ररोगाधिकारः)

अस्य निर्माणविधिस्त्वतीव सरलो वर्तते। हरिद्रा-दारुहरिद्रा-किराततिक्तक-आमलकी-हरीतकी-बिभीतक-निम्बत्वक्-रक्तचन्दनात्मकानामष्ट-संख्यात्मकानां द्रव्याणां पृथक्-पृथक् रूपेण दशग्रामपरिमाणे ग्रहणं कृत्वा चूर्णं विधाय जलेन सह पेषणं कृत्वा पिष्टिः करणीया। पृथक्रूपेण च 320 मि.लि. परिमितं तिलतैलं गृहीत्वा प्रतप्तं करणीयम्। प्रतप्तेऽस्मिन् तैले कल्कं प्रक्षिप्याग्निं मन्दं कृत्वाऽत्र चतुर्गुणं जलं 1280 मि.लि. परिमितं प्रक्षिप्य मन्दाग्निना पाकः करणीयः। पाकस्त्वेकस्मिन्नेव दिने न सम्पादनीयः। अपितु विरम्य विरम्य पञ्चषदिनेषु पाको विधेयः। जलस्यावशोषणानन्तरमवशिष्टं तैलमात्रं वस्त्रेण पूत्वा निधापनीयम्। अस्य तैलस्याभ्यङ्गः शिरसि करणीयः। शिरसि कण्डूविनाशनमरूं-षिकाणाञ्च नाशकमिदं तैलं शिरोऽर्तिहरमपि वर्तते।

**मुखकान्तिवर्धकः लेपः-**

रक्षोघ्नशर्वरीद्वयमञ्जिष्ठागैरिकानाञ्च पञ्च-द्रव्याणां सममात्रायां ग्रहणं कृत्वा बस्तपयसा सुसूक्ष्मं पेषणं प्रस्तरे मिक्सीनामके च यन्त्रे करणीयम्। पुनश्च किञ्चिन्मात्रं गोघृतं (नवनीतं वा) सम्मिश्र्यास्य लेपनं मुखे करणीयम्। युवानपिडकानां तथाऽन्यासां त्वग्विकृतीनां विनाशो भूत्वाऽऽननं विधुबिम्बवद्वि-भाति।

**हरिद्रादि गण-प्रयोग -**

हल्दी, दारुहल्दी, पृश्निपर्णी, इन्द्रजौ, मुलहठी, इनसे युक्त हरिद्रादिगण श्रेष्ठ स्तन्यशोधक होता है। आचार्य सुश्रुत कहते हैं कि हरिद्रादिगण विशेषरूप से दोषों का पाचन करने वाला होता है और स्तन्य (माँ के दूध) को शोधन करता है। आमातिसार का शमन करने वाला यह गण आमयुक्त दोषों का पाचन करता है, ऐसा व्याख्याकार डल्हण स्पष्ट करते हैं।

**हरिद्रादि तैल-**

भैषज्यरत्नावली में शिर में बार-बार होने वाली अरूंषिकाओं (छोटी फुंसियों) को नष्ट करने के लिए एक तैल कहा गया है-

हरिद्रा, दारुहरिद्रा, चिरायता, त्रिफला, नीम की छाल और लालचन्दन के द्वारा सिद्ध यह तैल शिर में अभ्यङ्ग करने पर अरूंषिकाओं के लिए हितकारी है। (शरीर में अन्यत्र अरूंषिकाएं हों तो उन में भी हितकर है।)

इसके निर्माण की विधि तो अत्यन्त ही सरल है हल्दी, दारुहल्दी, चिरायता, आँवला, हरड़, बहेड़ा, नीम की छाल और लाल चन्दन इन आठ संख्यावाले द्रव्यों को पृथक्-पृथक् रूप से 10-10 ग्राम की मात्रा में लेकर चूर्ण बना कर जल के साथ (सिलबट्टे पर) पीसकर पिष्टि बनानी चाहिए। अलग से 320 मि.लि. तिल का तैल लेकर गर्म करना चाहिए। अच्छी तरह गर्म हो जाने पर इस तैल में कल्क डालकर अग्नि को मन्द करके इसमें चार गुना जल 1280 ग्राम मि. लि. की मात्रा में डालकर मन्दाग्नि से पाक करना चाहिए। यह पाक एक ही दिन में सम्पन्न नहीं कर लेना चाहिए। अपितु रुक-रुक कर पाँच-छः दिन में पाक करना चाहिए। जल के इस पाक में सूख जाने पर बचे हुए तैलमात्र को कपड़े से छानकर रख लेना चाहिए। इस तैल का शिर में अभ्यङ्ग करना चाहिए। शिर में खुजली और फुंसियों को नष्ट करने वाला यह तैल शिर की पीड़ा को दूर करने वाला भी होता है।

**मुखकान्तिवर्धक लेप-**

पीली सरसों, हल्दी, दारुहल्दी, मंजीठ और स्वर्ण गैरिक इन पाँच द्रव्यों को समान मात्रा में लेकर बकरी के दूध से पत्थर पर या मिक्सी नामक यन्त्र में बारीक पीसना चाहिए। और इसके बाद कुछ मात्रा में गोघृत (या मक्खन) मिलाकर इसका लेप मुख पर करना चाहिए। मुख पर होने वाली फुंसियों तथा अन्य त्वचा की विकृतियों का नाश कर मुख चन्द्रमा के बिम्ब के समान चमकता है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,
झोटवाड़ा, जयपुर**

संस्कृतसमाचारः

# महाकविमाघमहोत्सवः ( दशदिवसीयः )





संस्कृतवाङ्मयस्य कालजयिमहाकविमाघस्य स्थानं विश्वप्रसिद्धमहाकविषु अग्रपङ्क्तौ विद्यते। अनेन महाकविना विरचितं ''शिशुपालवधम्'' संस्कृतसाहित्यस्य उत्कृष्टरचना अस्ति।

राजस्थानसर्वकारस्य मुख्यमन्त्रिण्या माननीयायाः श्रीमत्याः वसुंधराराजेमहोदयायाः सत्प्रेरणया महाकवि-माघस्य जीवनसाहित्ययोः श्रेष्ठपक्षेण समाजः परिचितो भवेत् इत्युद्देश्येन प्रथमवारं 01 फरवरी दिनाङ्कतः 10 फरवरी, 2017 दिनाङ्कपर्यन्तं दशदिवसीयः महाकविमाघमहोत्सवः राजस्थान-संस्कृत-अकादमीपक्षतः आयोजितः।

एतस्यान्तर्गतं प्रथमदिवसे 1 फरवरी, 2017 दिनाङ्के जयपुरस्य ''रामलीला मैदान'' इत्याख्ये स्थाने मेधावृद्धियज्ञः, सरस्वतीपूजनं तथा प्रायशः 5000 छात्राणां माध्यमेन सामूहिकसरस्वती वन्दनायाः आयोजनं कृतम्। अवसरेऽस्मिन् विभिन्नविद्यालयैः शोभायात्रायाः आयोजनं कृतम्। इयं शोभायात्रा जयपुरस्य न्यूगेट, चौड़ा-रास्ता, त्रिपोलिया-बाजार, छोटी-चौपड़, किशनपोलबाजार, अजमेरी-गेट तथा एम.आई. राजमार्गेण पुनः ''रामलीला-मैदान'' इत्यत्र प्राप्नोत्। शोभायात्रायां विभिन्न विद्यालयैः 20 दृश्यानां प्रदर्शनमपि कृतम्। प्रदर्शितदृश्येभ्यः श्रेष्ठदृश्यानां चयनं कृत्वा पुरस्कारा अपि प्रदत्ताः। प्रथमदिवसे समारोहेऽस्मिन् मुख्यातिथिः श्रीअरूणचतुर्वेदी (समाज-कल्याणमन्त्री), विशिष्टातिथिः श्रीमती किरण माहेश्वरी (संस्कृतशिक्षामन्त्री), सारस्वतातिथिः प्रो. विनोदशास्त्री (कुलपतिः, ज.रा.रा. संस्कृतविश्वविद्यालयः, जयपुरम्) चासन्। समारोहस्य अध्यक्षता राजस्थान-संस्कृत-अकादमीत्यस्य अध्यक्षया डॉ. जयादवे महोदयया कृता।

2 फरवरी दिनाङ्कतः 4 फरवरी, 2017 दिनाङ्कपर्यन्तं (त्रिदिवसीया) महाकविमाघविषयिणी राष्ट्रिय-संस्कृत-संगोष्ठी राजस्थानविश्वविद्यालयस्य संस्कृतविभागेन देराश्रीसभागारे आयोजिता। संगोष्ठ्याः शुभारम्भः राजस्थानविश्वविद्यालयस्य कुलपतिना श्रीमता राजेश्वरसिंहेन कृतः। अस्याः त्रिदिवसीयसंगोष्ठ्याः षट्सत्रेषु सम्पूर्ण-भारतदेशात् आगताः प्रायशः 260 वक्तारः शोधपत्राणि प्रस्तूय स्वीयविचारान् प्रस्तुतवन्तः। कार्यक्रमस्य संयोजनं संस्कृतविभागाध्यक्षेण डॉ. रामसिंहेन कृतम्।








4 फरवरी, 2017 दिनाङ्के संस्कृत-कवि-सम्मेलनस्यायोजनं राष्ट्रिय-संस्कृत-संस्थानं, जयपुर-परिसरः, जयपुरमित्यस्य सहयोगेन कृतम्। सम्मेलने वयोवृद्धाः, युवानः राष्ट्रपतिसम्मानिताः पद्मश्रीसम्मानिताः राष्ट्रियस्तरीयाः कवयः सोत्साहं भागं गृहीतवन्तः। कार्यक्रमस्यास्य संयोजनं डॉ. रामकुमारशर्मणा कृतम्।

5 फरवरी, 2017 दिनाङ्के संस्कृतसाहित्ये उपलब्धसूक्तिभ्यः विशिष्टसूक्तीनां भित्तिपट्टिकानां (स्टीकरस्) लोकार्पणं माननीयकालीचरणसराफमहोदयेन (स्वास्थ्य एवं चिकित्सामन्त्री, राजस्थानसर्वकारः) स्वकरकमलाभ्यां कृतम्। अवसरेऽस्मिन् माननीयमन्त्रिमहोदयेन स्वास्थ्यविषयक-सूक्तीनां राज्यस्य सर्वेषु चिकित्सालयेषु स्थापनायापि घोषणा कृता। समारोहस्य अध्यक्षता राजस्थान-संस्कृत-अकादमीत्यस्य अध्यक्षया डॉ. जयादवे महोदयया कृता।

6 फरवरी, 2017 दिनाङ्के रैवासाधाम्नि (सीकरस्थे) स्वामिनः राघवाचार्यमहाराजस्य सान्निध्ये भव्य-सन्त-सम्मेलनस्य आयोजनं कृतम्। सम्मेलनेऽस्मिन् इलाहाबाद-वाराणसी-जम्मूकश्मीर-पंजाब-हरियाणा-गुजरात-मध्यप्रदेशसहितदेशस्य विभिन्नक्षेत्रेभ्यः आगताः प्रायशः एकशतं पञ्चाशत् सन्तः सम्मिलिताः। समारोहस्य मुख्यातिथिः श्रीराजकुमाररिणवा (मन्त्री, देवस्थान-विभागः) तथा अध्यक्षः डॉ. जया दवे (अध्यक्ष, राजस्थान-संस्कृत-अकादमी) आस्ताम्।

7 फरवरी, 2017 दिनाङ्के जोधपुरनगरे चतुर्वेदपाठस्य विद्वत्सम्मानस्य चायोजनं कृतम्। समारोहेऽस्मिन् वेदानां विभिन्नपाठपद्धतीनां प्रदर्शनं कृतम्। 8 फरवरी, 2017 दिनाङ्के जयपुरस्थे ''वानिकी-प्रशिक्षण-संस्थानम्'' इत्यस्मिन् स्थाने संस्कृतयुवसम्मेलनस्य आयोजनमभूत्। अत्र संस्कृतस्य संस्कृतेतरक्षेत्रस्य च वक्तृभिः संस्कृतस्य विकासः, प्रचार-प्रसारः, जनसामान्ये संस्कृतस्य लोकप्रियता, रोजगारोन्मुखि-संस्कृतम् इत्यादिषु विषयेषु शोधपत्रमाध्यमेन स्वीयविचाराः प्रस्तुताः।

9 फरवरी, 2017 दिनाङ्के महाकविमाघस्य दानशीलतायाः परम्परानुसारं प्रदेशस्य विशिष्टदानदातॄणां सम्मानकार्यक्रमः जयपुरस्थे ''कृषि-प्रबन्धन-अनुसंधान-संस्थाने'' दुर्गापुरा इत्यत्र आयोजितः। दानशील-सम्मान-समारोहेऽस्मिन् सर्वसमाजतः प्रतिनिधयः सम्मिलिताः अभूवन्। समारोहस्य आयोजनं ''भारती'' संस्कृतमास-पत्रिका तथा राजस्थान-संस्कृत-अकादमीत्यनयोः संयुक्त-तत्त्वावधाने सञ्जातम्। कार्यक्रमेऽस्मिन् स्वामिनारायण दासमहाराजैः (त्रिवेणीधाम) सर्वेभ्यः आशीर्वादाः प्रदत्ताः। अध्यक्षता डॉ. जया दवे (अध्यक्षः राजस्थान-संस्कृत-अकादमी) द्वारा कृता। विशिष्टा तिथिरूपेण विद्यमानाः आसन् संस्कृत-शिक्षानिदेशकाः श्रीमन्तः विमलकुमारजैन-महोदयाः। साध्वी प्रीतिप्रियंवदाभगिन्याः प्रेरणादायि-उद्बोध-नेनापि सर्वे संतृप्ताः सञ्जाताः। कार्यक्रमस्य संयोजनं ''भारती'' पत्रिकायाः प्रबन्धसम्पादकेन श्रीमता सुदामशर्मणा कृतम्।

10 फरवरी, 2017 दिनाङ्के अस्य महाकविमाघ-महोत्सवस्य समापनं महाकवेः जन्मस्थाने भीनमालनगरे प्रभातपरिक्रमा-व्याख्यान-महाकविपूजनादिभिः कार्यक्रमैः सञ्जातम्। समारोहोऽयम् अम्बिका-शिक्षा-समितिः, भीनमाल इत्यस्य सहयोगेन आयोजितः।



**- रामानुजपाण्डेयः**

# दिल्ली संस्कृत अकादमी ( दिल्लीसर्वकारः )

प्लाट सं.-5, झण्डेवालान, करोलबागोपनगरम्, नवदेहली-110005

दुरभाष : 23635592, 23681835


# आवश्यक-सूचना

## आखिल भारतीय मौलिक संस्कृत लघु कथा एवं लघु नाटक लेखन-प्रतियोगिता

**( वर्ष 2016-17 )**

दिल्ली संस्कृत अकादमी द्वारा अखिल भारतीय स्तर पर संस्कृत विद्वानों एवं विदुषियों से संस्कृत भाषा में मौलिक रूप में लिखित संस्कृत लघु कथा एवं लघु नाटक पुरस्कारार्थ आमन्त्रित किये जाते हैं। जिसमें रू. 3000/-, रू. 2500/-, रू. 2000/-, रू. 1500/-, रू. 1200/-, रू. 1000/-, रू. 600/-, रू. 500/- के क्रमशः आठ पुरस्कार होंगे। इसके अतिरिक्त रू. 400/- के छः प्रोत्साहन पुरस्कार दिये जायेंगे।

प्रतिभागी लेखक निम्नलिखित दिशा निर्देशों को दृष्टि में रखकर ही अपनी रचना भेजें :-

1. लघु कथा एंव लघु नाटक स्वयं की मौलिक रचना होनी चाहिए।

2. संस्कृत लघु कथा एवं लघु नाटक ए-4 आकार के कम से कम 4 पृष्ठों एवं अधिक 5 पृष्ठों में तथा 14 पाइण्ट साईज में टंकित रूप में होनी चाहिए।

3. लघु कथा एवं लघु नाटक का कोई भी अंश राष्ट्र विरोधी तथा व्यक्तिगत आक्षेप युक्त नहीं होना चाहिए।

4. लघु कथा एवं लघु नाटक बालोपयोगी तथा शिक्षाप्रद होनी चाहिए।

5. लघु कथा एवं लघु नाटक की मौलिक रचनाएं ईमेल अथवा डाक द्वारा दिनांक 15.03.2017 तक अकादमी कार्यालय में प्राप्त होनी चाहिए।

6. लेखकों द्वारा लघु कथा एवं लघु नाटकों के लिए लेख अलग-2 भेजा जायेगा।

अधिक जानकारी के लिए अकादमी की वेब साईट www.sanskritacademy.delhi.gov.in पर देखें। Facebook : www.facebook.com / delhisanskritacademy

E-mail : delhisanskritacademy@gmail.com

ह.-

**( डॉ. जीतराम भट्ट )**

सचिव

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाष: 011-47642000 से 30 फैक्स: 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,